व्याघ्रभयम्=व्याघ्राद्भयम्। सुखापेतः। गृहापोढः (carried away from home)। हस्तमुक्तः। स्वर्गपतितः। तरङ्गापत्रस्तः (afraid of waves), घनेतरत् (other than solid or thick), &c.

*N. B.*—'प्रासादात्पतितः' No compound takes place here, because 'the fall' is actual and not figurative.

(5) The subordinate member receives the Locative when it denotes time or place of an action, or when it is followed by words meaning cleverness, skill, &c. The most important of the latter are:—शौण्ड, धूर्त, कितव, प्रवीण, पटु, पण्डित, कुशल, चपल, निपुण, &c. *E. g.*

अवसरप्राप्तः=अवसरे प्राप्तः। आसनस्थितः=आसने स्थितः। नरश्रेष्ठः। अक्षशौण्डः। पुरुषोत्तमः। कार्यकुशलः। इ०।

The word अधि is changed to अधीन when it stands as the principal member in a Tatpurusha compound, and governs the Locative. *E. g.*

राजाधीनः=राज्ञि अधि ( dependent on the king ).

(6) The subordinate member receives the Genitive when it denotes any relation to the principal not expressible by the other cases, as mentioned above. *E. g.*

राजपुरुषः=राज्ञः पुरुषः। मूर्खशतम्=मूर्खाणां शतम्। गिरिनदी=गिरेर्नदी। अश्वमुखम्=अश्वस्य मुखम्। उपलशकलम्। देशविभागः। पुत्रजन्म। भोजनवेला। तदुपरि=तस्योपरि। त्वत्कृते=तवकृते। इ०।

When पूर्व, अपर, अधर, उत्तर ( and sometimes अर्ध and मध्य ), used as Neuter nouns denoting parts, form the principal member of a Genitive Tatpurusha, they are placed first and the subordinate member which denotes the whole stands second, the compound having the gender and number of the latter. *E.g.*

पूर्वकायः=कायस्य पूर्वम् ( the forepart of the body ), मध्यदेशः or देशमध्यम्=देशस्य मध्यम्। अर्धदिनम् or दिनार्धम्=दिनस्यार्धम्। इ०।

A word denoting an occurrence is compounded with another denoting time which has elapsed since the occurrence. This compound, called Gen. Tatpurusha, is adjectival. *E. g.*

मासजातः=मासो जातस्यास्य। संवत्सरमृतः। इ०।

12. A Tatpurusha compound may be formed in which the first member is an adverb or an indeclinable particle. *E. g.*

बहिर्गतः। स्वयंकृतम्। सामिकृतम् ( divided into two)। ईषत्पिङ्गलः ( slightly tawny )। विनाकृतः ( separated from )। एवंस्थितः। सुरक्षितम्। तत्रगतः। चिरदृष्टा। भृशदुःखितः। इ०।

13. When the negative particle अ or अन् is the first member of a Tatpurusha compound, it is called नञ्तत्पुरुष. *E. g.*

अब्राह्मणः=न ब्राह्मणः ( not a Bráhma*n*a )। अमित्रः=न मित्रम्। असुरः। अनश्वः। अप्रियम्। अचिरात्। इ०।

## *EXERCISE II.*

मारीचो हेमहरिणरूपेण सीतायाश्चित्तं व्यलोभयत्। राज्ञा गृहीतं विहंगं वीक्ष्य तदन्ये विहगा वृक्षशाखाभ्य उदडयन्त। नैव विद्यासमं शरीरभूषणं पुरुषाणामतो

विद्यामुपार्जयध्वम् । कुरुपतिना पाण्डवेभ्यः संदिष्टं न वो ग्रामार्धमपि प्रयच्छामि कुतोऽर्धराज्यमिति। सुहृद्गतां वार्तां त्वन्मुखाच्छ्रोतुमिच्छामः ।

किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ।
पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ।
अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ।
किं त्वं पदैर्मम पदानि विशेषयन्ती
व्यालीव यासि पतगेन्द्रभयाभिभूता ।
यदादित्यगतं तेजो जगद्भासयतेऽखिलम्
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥
अकृत्वा परसंतापमगत्वा खलनम्रताम् ।
अनुत्सृज्य सतां वर्त्म यत्स्वल्पमपि तद्बहु ॥
विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥
इक्ष्वाकुवंशोऽभिमतः प्रजानां जातं च दैवाद्वचनीयबीजम् ।
यच्चाद्भुतं कर्म विशुद्धिकाले प्रत्येतु कस्तच्छ्रुवि दूरवृत्तम् ॥
जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥

When he saw his son *exposed to peril*, he went to *his assistance.*

There, O cloud, you should frighten *the celestial damsels, engaged in sports*, with thunders *dreadful to hear.*

*Without hearing* the words *uttered by him*, she shut the *door of her house* and went her way.

Bring me water *for bath* and Darbha grass for *religious rites*.

*Overcome by the fear of demons* the sages left the *performance of austerities* in *holy forests.*

*Your brother* must have by this time gone home *without coming* here.

*The best of clouds, intent on doing good to others,* communicated that message to *Yaksha's wife.*

*Blind through drunkenness* they did not listen to my request *reduced to misery* ( as I was ).

Where is the ring you have got ? It is *not seen before* by us.

NOTES—संदिष्टम् ( used impersonally )—A message was sent to. पर्यायपीतस्य &c.—The waning of the moon in the dark half of a lunar month is supposed to be due to her being drunk up by the gods. इक्ष्वाकुवंशोऽभिमतः प्रजानां &c.—In this stanza the च in the first line means 'on the one hand' and the च in the second 'on the other hand.' अभिमतः प्रजानां—is favourite of or respected by the people, ( the past participle अभिमत being used in the sense of the Present tense and construed with the Gen. ). अद्भुतं कर्म=वह्नौ विशुद्धिः *Cf.* घोरं लोके विततमयशो या च वह्नौ-विशुद्धिर्लंकाद्वीपे कथमिव जनस्तामिह श्रद्दधातु। *Exposed to peril*—प्राप्तजीवितसंशय *adj.*। *The celestial damsels*-सुरयुवतयः। *Dreadful to hear*—श्रुतिपरुष *adj.*। *Without hearing*—अश्रुत्वा। *For bath*—स्नानार्थ *adj.*। *For religious rites*—क्रियार्थ *adj.*। *In holy forests*—तपोवनेषु। *Must have gone &c.*—गृहं गन्तव्यम्। *Without coming here*—अत्रानागत्य। *The best of clouds*—जलधरवरः। *Intent on doing good &c.*-परहितरतः। *Reduced to misery*—दुःखापन्न *adj.*। *Not seen before*—अदृष्टपूर्व *adj.*।

## *VOCABULARY II.*

अखिल *adj.* Whole, entire.

अग्रेसर *adj.* The foremost.

अङ्गुलीय *n.* A ring.

अन्ध *adj.* Blind.

अभिमत *adj.* Favourite of, approved of.

अभिरुचि *f.* Taste, liking.

अभ्युदय *m.* Prosperity.

अर्ज् *vt.* ( अर्जयति-ते 10. U. ) To earn. With उप To acquire.

अर्ध *n.* A half.

आसक्त *pp. adj.* Engaged in, intent on.

इ *vt.* With प्रति To believe in.

इक्ष्वाकु *m.* Name of a king of the solar race.

कला *f.* A digit. An art.

कुरु *m. pl.* Name of a country.

कृ *vt.* With अपा To remove.

केसरिन् *m.* A lion.

क्रिया *f.* An action, a religious rite.

क्षय *m.* Decrease, waning.

क्षमा *f.* Forgiveness.

उन्नति *f.* Rise, elevation.

गन्तव्य *poten. parti. adj.* of गम्.

गर्जित *n.* A thunder.

जलधर *m.* A cloud.

जाड्य *n.* Dulness, stupidity.

जीर्ण *pp. adj.* Decayed, worn out, old.

तृण *n.* Grass.

तेजस् *n.* Light, lustre.

दिश् *vt.* (6.P.) To point a way to.

दृष्टपूर्व *adj.* Seen before.

दैव *n.* Destiny, fate.
धा *vt.* With पि or अपि To shut.
नम्र *adj.* Humble.
पतंग *m.* A bird.
परुष *adj.* Harsh.
प्रकृतिसिद्ध *adj.* Natural.
प्रसादय (*caus.* of सद् with प्र) To please, to propitiate.
प्रार्थन *n.* A request.
बीज *n.* Seed.
भास् *vi.* (भासते 1. A.) To shine.
मद *m.* Drunkenness.
मान *m.* Honour, respect.
मामक *adj.* (०मिका *f.*) Mine.
मारीच *m.* Name of a demon.
वंश *m.* A race, a line.
वचनीय *n.* Reproach, censure.
वर *adj.* The best.
वाक्पटु *adj.* Clever in speech, eloquent.
विद्या *f.* Learning.
विपद् *f.* Adversity.
विलोभय (*caus.* of लुभ् with वि) To allure, to tempt.
विशेषय (*caus.* of शिष् with वि) To exceed, to surpass.
वृत्त *pp. adj.* Happened.
वृद्धि *f.* Increase, waxing.
व्यसन *n.* Attachment, application, misfortune.
व्याल *m.* (०ली *f.*) A serpent.
श्रुति *f.* Hearing. The ear. The Veda.
श्लाघ्य *adj.* Praiseworthy.
संशय *m.* Peril, danger, doubt.
संगति *f.* Company.
सदस् *n.* An assembly.
सन्ताप *m.* Affliction, pain.
सन्दिष्ट *pp. adj.* Communicated, sent as a message.
सन्देश *m.* Message.
सुर *m.* A god.
हिमांशु *m.* The moon.
हेमहरिण *m.* A golden deer.

---

# LESSON III.

## COMPOUNDS (*Continued*).

### KARMADHA'RAYA or APPOSITIONAL DETERMINATIVE COMPOUND and DVIGU.

**14.** The Karmadhâraya compound, like the Tatpurush, consists of two members the second of which is generally the principal and the first subordinate. The subordinate member is generally an adjective or a noun in apposition. It is the characteristic of a Karmadhâraya that when the compound is dissolved both the members of it stand in the same case *i. e.* the Nominative.

This compound is possible in the following cases :—

(1) The first member may be an adjective and the second a noun qualified by it. *E. g.*

कृष्णसर्पः, ०र्पौ, ०र्पाः=कृष्णश्चासौ सर्पश्च, कृष्णौ च तौ सर्पौ च, कृष्णाश्च ते सर्पाश्च । रक्तलता, ०ते, ०ताः = रक्ता चासौ लता च, रक्ते च ते लते च, रक्ताश्च ता लताश्च । नीलोत्पलम्, ०ले, ०लानि = नीलं च तदुत्पलं च, नीले च ते उत्पले च, नीलानि च तान्युत्पलानि च । शुक्लपक्षः । श्वेताम्बरे । *महापुरुषः । *महाशैलः । इ० ।

The adjective may in some cases stand second and the noun be placed first. *E. g.*

नराधमः=अधमो नरः । वीरैकः or एकवीरः=एको वीरः । तापसवृद्धः or वृद्धतापसः = वृद्धस्तापसः । छात्रव्यंसकः=व्यंसकश्छात्रः । क्षत्रियापसदः= अपसदः क्षत्रियः । पुत्रकृतकः or कृतकपुत्रः । इ० ।

The word अन्तर meaning 'another' stands second in a Karmadhâraya and the compound is always Neuter. *E. g.*

राजान्तरम्=अन्यो राजा । भाषान्तरम्=अन्या भाषा । कार्यान्तरम्=अन्यत्कार्यम् । देशान्तरम् । ग्रामान्तरम् । इ० ।

(2) The first member may be a noun denoting the *standard of comparison* ( उपमान ) and the second an adjective indicating the *common quality* ( साधर्म्य ). *E. g.*

घनश्यामः = घन इव श्यामः । फेनधवलः । लोध्रपाण्डु । उत्पलकोमलम् । इ० ।

(3) The first member may also be a noun denoting the *object of comparison* ( उपमेय ) and the second a noun denoting the *standard of comparison* ( उपमान ). *E. g.*

मुखचन्द्रः=मुखं चन्द्र इव (the moon-like face) । राजर्षिः=राजा ऋषिरिव ( a sage-like king ) । नेत्रकमलम् । दुःखाग्निः । भवसागरः । पुरुषव्याघ्रः । इ० ।

( *N. B.* The words व्याघ्र, पुंगव, ऋषभ, कुञ्जर, सिंह, शार्दूल, नाग and others standing at the end of a Karmadhâraya compound signify 'excellent,' 'best,' 'powerful,' &c. )

When the above-mentioned compounds do not involve comparison ( उपमा ) but a metaphor ( रूपक ), they are dissolved

---

* The adjective महत् is changed to महा when it is the *first* member of a Karmadhâraya or a Bahuvrîhi compound.

thus:—मुखमेव चन्द्रः । राजैव ऋषिः । नेत्रमेव कमलम् । दुःखमेवाग्निः । भव एव सागरः । पुरुष एव व्याघ्रः । इ० ।

(4) Both the members of a Karmadháraya may be adjectives qualifying one and the same noun. *E. g.*
कृष्णसारङ्गः=कृष्णश्चासौ सारंगश्च । कृताकृतम्=कृतं च तदकृतं च ( done and not done *i. e.* badly done ) । इ० ।

Two past participles, one denoting a previous action and the other a subsequent action may form a Karmadháraya. *E. g.* स्नातानुलिप्तः=पूर्वं स्नातः पश्चादनुलिप्तः । गृहीतप्रतिमुक्तः । पीतप्रतिबद्धः । इ० ।

15. (*a*) Indeclinables having the sense of adjectives may be used as first members of Karmadháraya compounds. *E. g.* नानाविद्याः=अनेका विद्याः ( various lores ), उच्चैः पदम्=उन्नतं पदम् (an elevated position), अन्तरात्मा, अधोभुवनम्, बहिरिन्द्रियम्, पुरोवातः, पृथग्जनः, नीचैर्गिरिः, मिथ्यापवादः, वृथाश्रमः, *&c.*

(*b*) A few particles are used in an adjectival sense to form the first member of a Karmadháraya compound:—

कु, का, कद्, किम्=कुत्सित 'bad'; सु=शोभन, साधु, सम्यक् 'good', 'well'; दुस्=दुष्ट, निन्दित 'bad', 'spoiled'.

कुपुरुषः=कुत्सितः पुरुषः । कापुरुषः । कदश्वः । किंसखा । इ० ।
सुपुरुषः=शोभनः पुरुषः । सुगन्धः । सुमार्गः । सुकृतम् । इ० ।
दुर्नीतिः=दुष्टा नीतिः । दुष्कर्म=निन्दितं कर्म । दुर्जनः । इ० ।

16. A Dvigu compound is really a variety of the Karmadháraya, differing from it only in two respects, *viz.*, (1) that its subordinate member is a numeral adjective and (2) the compound denotes an aggregate of the number, and as such is primarily singular, being declined in the Neuter or Feminine ( in which last case the suffix ई is added ). *E. g.*

त्रिभुवनम्=त्रयाणां भुवनानां समाहारः ।
त्रिलोकी=त्रयाणां लोकानां समाहारः ।

Similarly चतुर्युगम्, दशकुमारम् or दशकुमारी (collection of ten youths ).

17. The following rules regarding changes of final syllables apply to Tatpurusha, Karmadháraya and Dvigu compounds:—

(*a*) सखि is changed to सख. *E. g.* कृष्णसखः । प्रियसखः । इ० ।

(*b*) राजन् is changed to राज. *E. g.* वङ्गराजः । महाराजः । इ० ।

(*c*) अहन् is changed to अह (*m.*). *E. g.* उत्तमाहः । सप्ताहः ( an aggregate of seven days ). But it is changed to अह्न (*m.*) after indeclinables, सर्व and words denoting parts of the day. *E. g.* प्राह्णः ।सायाह्नः । सर्वाह्णः । मध्याह्नः । इ० ।

(*d*) पथिन् is changed to पथ (*m.*). *E. g.* राजपथः । धर्मपथः । इ० । When it stands at the end of a Dvigu, it is changed to पथ (*n.*), as also when preceded by indeclinables. *E. g.* त्रिपथम् । कापथम् । विपथम् । इ० ।

(*e*) रात्रि is changed to रात्र (*n.*) after numerals, and रात्र (*m.*) after indeclinables and words denoting parts of the night and after सर्व and पुण्य. *E. g.* द्विरात्रम् । सर्वरात्रः । मध्यरात्रः । पूर्वरात्रः । पुण्यरात्रः । इ० ।

(*f*) गो is changed to गव ( गवी *f.* ). *E. g.* परमगवः । पञ्चगवम् । ( Dvi. )

(*g*) नौ is changed to नाव (*n.*) after अर्ध and in Dvigu. *E. g.* अर्धनावम् । द्विनावम् ।

*N. B.*—The changes mentioned above do not take place after सु, अति, किम् and अ. *E. g.* सुराजा, किंराजा, अराजा, किंसखा, अपन्थाः ( or अपथं *n.* ), सुपन्थाः । इ० ।

## *EXERCISE III.*

त्रिलोकीप्रथिता राजशार्दूलाः समरमपास्यान्यतो न प्रयान्ति मृत्योर्भयात्। दुःखाग्निसंतप्तस्यास्य जनस्य शीतलवारिधारा शान्तये न भवति। तेनैव दीपदर्शितेन गूढपथेन गत्वा मध्यरात्रे वासगृहं प्रविष्टोऽसौ विश्रब्धसुप्तं तं दुरात्मानं न्यगृह्णात् । उज्जयिन्यां दशाहमुषित्वा परमेश्वरं महाकालमाराध्य भूपतिरयोध्यां न्यवर्तत । श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते । गृहीतप्रतिमुक्तस्य मालवराजस्य रघुणा श्रीरपाह्रियत न तु मेदिनी । देशान्तरादुज्जयिनीं गतान्पथिकान्प्राचीनाख्यायिकाभिस्तत्रस्थो जनो रमयति स्म ।

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैले ।
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
न पृथग्जनवच्छुचो वशं वशिनामुत्तम गन्तुमर्हसि ।
संपत्सु महतां चित्तं भवत्युत्पलकोमलम् ।

आपत्सु च महाशैलशिलासंघातकर्कशम् ॥
पात्रविशेषन्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥
स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः ।
यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
प्रोद्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥
तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योद्याने कृतकतनयो वर्धितः कान्तया मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥

Waves *as big as mountains* were seen in the turbulent water of the *salt ocean.*

One should stay for *three nights* at a *holy place.*

The wood-cutter felled down all *the tall trees* in that *dense forest.*

*The great king* obtained the *way to heaven* by these *meritorious deeds.*

Will Ráma accept the sovereignty of the earth *enjoyed and left* by Bharata?

The *sage-like king* has been unwell since the day on which he returned from the hermitage of Kanva.

Having narrated *various stories* in the *first part of the night,* they set out to *another village* in the *latter part.*

You hurry, O cloud, with *deep and pleasant* sounds, *crowds of fatigued travellers, eager to comfort their beloved ones.*

He performed two sacrifices, the one *in ten* and the other *in twelve days.*

NOTES:—शान्तये न भवति—See footnote on page 70 of the F. S. C. विशिष्यते—See Art. 58 of the S. S. C. part 1. आपृच्छस्व—The root प्रच्छ् with आ is Atm. and means 'to take leave of,' 'to bid farewell to.' पात्रविशेषन्यस्तं—Placed in or imparted to an excellent material. गुणान्तरं—A higher merit or

excellence. हितान्न (हितात्+न) &c.—From a friend or wellwisher. (One who does not listen to *i. e.* receive advice from a friendly adviser). प्रोद्दीप्ते भवने तु &c.—An excellent advice to those who do things at the eleventh hour. उत्तरेण—When words expressing direction ending in एन are used, they are construed with the Acc. or Gen. of the place with respect to which the direction is shown; thus उत्तरेण or दक्षिणेन गृहान् गृहाणां वा=To the North, South, &c. of the large house. *The salt ocean*—लवणाम्भोधिः । *Turbulent.*—क्षुब्ध *adj.* । *A holy place*—पुण्यक्षेत्रम् । *Dense forest*—निबिडारण्यम् । *Enjoyed and left*—भुक्तोत्सृष्ट *adj.* । *The first part of the night*—पूर्वरात्रः । *The latter part*—अपररात्रः । *Deep and pleasant*—मन्द्रस्निग्ध *adj.* । *Crowds of fatigued travellers*—श्रान्तपथिकवृन्दानि । *In ten* (days)—दशाहेन । Words expressive of time or place are used in the Instrumental when completion of the thing desired is meant to be expressed.

## VOCABULARY III.

अगार *n.* A house.
अङ्कित *pp. adj.* Marked.
अधिप *m.* A king.
अन्यतः *Indecl.* Elsewhere.
अपर *n.* The latter part.
अप्रतिहत *adj.* Unimpaired, unmarred.
अस् *vt.* With अप To leave, to abandon.
अस्मदीय *adj.* Our.
आख्यायिका *f.* A story.
आधातृ *m.* One who imparts.
आराधय (*Caus.* of राध् with आ) To propitiate, to please.
आश्वासन *n.* Consoling, cheering up.
उज्जयिनी *f.* Name of a city in Malva.
उत्तरेण *Indecl.* To the north of.
उत्सुक *adj.* Eager.
उत्सृष्ट *pp. adj.* Left.
उषित्वा *Ger.* of वस् To dwell.
कर्कश *adj.* Harsh.
कलेवर *n.* The body.
कान्त *m.* (०न्ता *f.*) Beloved one.
काष्ठच्छिद् *m.* A wood-cutter.
कीदृश *adj.* Of what sort?
कृतक *adj.* (०तिका *f.*) Adopted.
खनन *n.* Digging.
गूढ *pp. adj.* Concealed, hidden.
गृह *m. pl.* A large house.
ग्रह् *vt.* With नि To seize, to punish.
चारु *adj.* Beautiful, fine.
तत्रस्थ *adj.* Thereof.
तावत् *Indecl.* So long.
तुङ्ग *adj.* Lofty.
तोरण *n.* An archway.

त्वरय (*Caus.* of त्वर् 1. A.) To hurry.

दर्शित *pp. adj*. Shown.

धनपति *m*. The god of wealth.

नमित *pp. adj*. Bent, weighed down.

निबिड *adj*. Dense, thick.

पयोद *m*. A cloud.

परम *adj*. Great.

पात्र *n*. A vessel, a fit person.

पूर्व *n*. The first part.

पृथग्जन *m*. A mean person, a fool.

प्रतिमुक्त *pp. adj*. Released.

प्रत्युद्यम *m*. Exertion, effort.

प्रथित *pp. adj*. Celebrated.

प्राचीन *adj*. Old, ancient.

प्राप्य *adj*. Within reach.

प्रोद्दीप्त *pp. adj*. Blazing, on fire.

बाल *adj*. Young.

भवन *n*. A house.

भुक्त *pp. adj*. Enjoyed.

मध्य *n*. The middle part.

मन्दार *m*. A kind of tree.

मन्द्र *adj*. Deep.

महाकाल *m*. Name of S'iva.

मालव *m. pl*. Name of a country.

मुक्ताफल *n*. A pearl.

मेखला *f*. A slope, a side.

मेदिनी *f*. The earth, land.

यावत् *Indecl*. As long as.

रघुपति *m*. Râma, the chief of the Raghus.

रमय (*Caus.* of रम्) To entertain, to give delight to.

लिङ्ग् *vt*. With आ To embrace.

लक्ष्य *adj*. Recognizable, observable.

वन्द्य *adj*. Fit to be worshipped or saluted, adorable.

वर्धित *pp. adj*. Reared.

वशिन् *adj*. Self-controlled, strong-minded.

विशेष *m*. (At the end of a Tatp. compound) Excellent, distinguished, a kind of.

विश्रब्ध *adj*. Confiding. *adv*. Confidingly, securely.

वृन्द *n*. A crowd.

शार्दूल *m*. A tiger.

शिल्प *n*. Art, skill.

शिष् with वि (*pass.*) To be preferred, to be better than.

शुक्ति *f*. A pearl-oyster, an oyster-shell.

श्रु with सम् *vi*. (A.) To listen.

शैल *m*. mountain.

श्राद्ध *n*. A ceremony performed in honour of a deceased ancestor.

संघात *m*. Assemblage, multitude.

समर *n*. Field, battle.

सुरपति *m*. Indra, the lord of the gods.

स्तबक *m*. A cluster or bunch of flowers.

स्वस्थ *adj*. Safe, sound.

---

# LESSON IV.

## COMPOUNDS ( *Continued* ).

### BAHUVRÎHI OR ATTRIBUTIVE COMPOUNDS.

**18.** A Bahuvrihi compound usually consists of two members and is an adjective, the adjectival sense of it being wholly due to the formation of the compound and not to any of the members being an adjective.

It denotes the possession of what is signified by the second member as qualified or modified by the first. As the compound is an adjective, the possession is attributed to the person or thing signified by the noun which the compound qualifies. This noun does not, of course, form any part of the compound itself. The relation between the members of the compound is in most cases the same as that in a Tatpurusha, Karmadhâraya or Dvigu, with this difference that the Bahuvrîhi conveys in addition the idea of possession of what in the other compounds is denoted by the principal member. Thus :—

दीर्घबाहू Karm. ( Masc. ) Nom. du. )=दीर्घौ बाहू (two long arms ).

दीर्घबाहुः Bahu. ( *Adj* )=दीर्घौ बाहू यस्य सः (one possessed of long arms, long-armed. )

उष्ट्रमुखम् Tatp. ( Neut. Nom. sing. )=उष्ट्रस्य मुखम् ।

उष्ट्रमुखः Bahu. ( *Adj.* )=उष्ट्रस्य मुखमिव मुखं यस्य सः (having the face or head like that of a camel, camel-headed. )

त्रिपुरम् Dvigu ( Neut. Nom. sing. )=त्रयाणां पुराणां समाहारः ।

त्रिपुरः ( दैत्यविशेषः ) Bahu. ( *adj.* used as a proper noun )=त्रीणि पुराणि यस्य सः ( the lord of three cities ).

We give below some typical examples of Bahuvrîhi compounds with their dissolution, &c.—

पीताम्बरः = पीतमम्बरं यस्य सः ( wearing a yellow garment ) । बहुधनः । इ० ।

ऊढरथः = ऊढो रथो येन सः ( one that has drawn a chariot ) । त्यक्तजीवितः । नियतेन्द्रियः । इ० ।

मेघनादः = मेघस्य नाद इव नादो यस्य सः ( thundering like a cloud )। शुकनासः । मृगरूपः । इ० ।

नलाभिधः = नलोऽभिधा यस्य सः ( Nala by name, or called Nala )। चित्रग्रीवनामा । राजसंज्ञः । इ० ।

इन्द्रादयः = इन्द्र आदिर्येषां ते (Indra and others) । इन्द्रप्रभृतयः । इन्द्रपुरोगाः । इ० ।

चतुर्भुजः = चत्वारो भुजा यस्य सः (four-armed) । त्रिलोचनः । पंचबाणः । दशमुखः । इ० ।

शतमखः = शतं मखा यस्य सः ( one who has performed a hundred sacrifices ), सहस्रदीधितिः । विंशतिभुजः । इ० ।

*सुहृदयः = साधु हृदयं यस्य सः ( kind-hearted ) । कुमतिः । दुर्बुद्धिः ।

एवंविधः = एवं (ईदृशी) विधा यस्य सः (of this kind, such) । द्विविधः = द्वे विधे यस्य सः । त्रिविधः । इ० ।

*नानाविधः = नाना ( अनेकाः) विधा यस्य सः । बहुविधः । इ० ।

*उच्चैःशिराः = उच्चैः (उन्नतं) शिरो यस्य सः (having a high head) । अधोमुखः । ऊर्ध्वगतिः । अन्तःसारः । पुरोजन्मा । इ० ।

कमलनयना = कमले इव नयने यस्याः सा (lotus-eyed) । बिम्बाधरा । इन्दुवदना । इ० ।

मानसजन्मा (मदनः) = मानसे जन्म यस्य सः (mind-born, the god of love).

क्रोधपरः = क्रोधः परं यस्य सः (full of wrath) । शोकपरायणा । इ० ।

19 In some Bahuvrîhi compounds, the attributive member is placed the last. *E. g.*

चक्रपाणिः = चक्रं पाणौ यस्य सः ( holding a disc in the hand) । दण्डहस्तः । इ० ।

भक्तप्रियः or प्रियभक्तः = भक्तः प्रियो यस्य सः ( fond of his devotee).

पीतघृतः or घृतपीतः = पीतं घृतं येन सः ।

अस्याकृष्टः or आकृष्टासिः = आकृष्टोऽसिर्येन सः (with the sword drawn).

20. In dissoliving a Bahuvrîhi compound, the relative pronoun ( यद् ) used to express the adjectival character of the compound should have the number and gender of the word qualified by the compound, and its case should be Genitive, except when the subordinate member requires any other case. *E. g.*

---

* Compare Art. 15.

श्वेताम्बरः=श्वेतमम्बरं यस्य सः। श्वेताम्बराः=श्वेतान्यम्बराणि येषां ते।
श्वेताम्बरा= „ यस्याः सा। „ = „ यासां ताः।
श्वेताम्बरम्= „ यस्य तत्। श्वेताम्बराणि= „ येषां तानि।
प्राप्तोदकः=प्राप्तमुदकं यं सः (ग्रामः)। ऊढरथः=ऊढो रथो येन सः।
उपहृतपशुः=उपहृतः पशुर्यस्मै सः (रुद्रः)। निर्गतारिः=निर्गता अरयो यस्मात् सः (देशः)। उप्तबीजा=उप्तं बीजं यस्यां सा (भूमिः)।

21. (*a*) The attributive member in some Bahuvrîhi compounds is the negative particle अ or अन्. *E. g.* अकारणम्= अविद्यमानं कारणं यस्य तत् (without any cause)। अमूल्यम्। अनन्तम्। अनश्वः। अनङ्गः। अनादिः। इ०। (These compounds are called नञ्बहुव्रीहि).

(*b*) The particle स or सह may form the first member of a Bahuvrîhi compound and the compound is called सहबहुव्रीहि. *E. g.* सपुत्रः or सहपुत्रः=पुत्रेण सह। सकामः। सदारः। सोदरः or सहोदरः=समानमुदरं यस्य सः। सवर्णः। सपक्षः। इ०।

22. The following compounds are classed as Bahuvrîhi by native grammarians:—

दक्षिणपूर्वा=दक्षिणस्याः पूर्वस्याश्च दिशोरन्तरालम् (the south-east)। उत्तरपूर्वा (The North-east)। उपदशाः=दशानां समीपे ये सन्ति (nearly ten)। आसन्नविंशाः=विंशतेरासन्नाः (about twenty)। अदूरत्रिंशाः= त्रिंशतोऽदूराः (not far from thirty)। अधिकचत्वारिंशाः=चत्वारिंशतोऽधिकाः (more than forty)। अधिकसप्तताः (more than seventy)। द्वित्राः=द्वौ वा त्रयो वा (two or three)। त्रिचतुराः (three or four)। पञ्चषाः=पञ्च वा षड्वा। द्विदशाः=द्विरावृत्ता दश (twice ten *i. e.* twenty)। त्रिदशाः (thrice ten *i. e.* thirty)। इ०।

The compounds उपदशाः and others that follow are called संख्याबहुव्रीहि and are always in the plural.

23. Bahuvrhîhi compounds ending in अङ्ग, गात्र, उदर, स्तन, कण्ठ, ओष्ठ, दन्त, मुख, अक्ष (for अक्षि), नासिका, कर्ण, शृङ्ग, and केश (all meaning parts of the body of an animal) change their final अ to ई in forming the Feminine base. *E. g.* सुन्दराङ्गी, (सुन्दराङ्ग *m.*), तनुगात्री, कृशोदरी, चारुकर्णी, तीक्ष्णशृङ्गी, किन्नरकण्ठी, बिम्बोष्ठी*, चन्द्रमुखी, पतितदन्ती, कमलाक्षी, सुकेशी, &c.

---

* The initial ओ of ओष्ठ and ओतु combines with a preceding

24. The following changes of final syllables take place in Bahuvrîhi compounds :—

(*a*) अक्षि is changed to अक्ष. When अक्षि means the eye of an animal, the Feminine base is formed by adding ई, otherwise by आ. *E. g.* कमलाक्षः ( °क्षी *f.* ). But स्थूलाक्षा वेणुयष्टिः ( a bamboo stick with large knots ).

(*b*) गन्ध is changed to गन्धि after उत्, सु, सुरभि and पूति. *E. g.* उद्गन्धिः । सुरभिगन्धि । पूतिगन्धि=पूतिः ( दुष्टः ) गन्धो यस्य तत् ( कुसुमम् ) । It is also changed to गन्धि after words of comparison. *E. g.* मधुगन्धिः=मधुनो गन्ध इव गन्धो यस्य सः ( smelling like honey ) । पद्मगन्धि । इ० ।

(*c*) जाया is changed to जानि. *E. g.* उमाजानिः=उमा जाया यस्य सः । लक्ष्मीजानिः । इ० ।

(*d*) दन्त is changed to दत् after सु and numerals intended to show age, ( the compound ending in दत् being declined like सत् ). *E. g.* सुदन् । सुदती । द्विदन् । द्विदती । But एकदन्तः । पतितदन्ती ।

(*e*) धनुस् is changed to धन्वन्. *E. g.* गाण्डीवधन्वा । सुधन्वा ।

(*f*) धर्म is changed to धर्मन् when preceded by only one word in the same compound. *E. g.* समानधर्मा । सुधर्मा ।

(*g*) पाद is changed to पाद् after numerals, सु and many words of comparison. *E. g.* द्विपाद् ( *Fem.* द्विपाद् or द्विपदी ), सुपाद् ( *Fem.* सुपाद् or सुपदी ), व्याघ्रपाद् । इ० ।

(*h*) प्रजा (progeny) and मेधा (intelligence, wisdom) become प्रजस् and मेधस् after सु, दुस् or दुर् , and अ ( negative particle ). *E. g.* सुप्रजाः, दुष्प्रजाः, अप्रजाः, सुमेधाः, । दुर्मेधाः, अमेधाः ।

(*i*) पथिन् is changed to पथ, and गो to गु. *E. g.* रम्यपथो देशः; चित्रगुर्देवदत्तः । इ० ।

25. Bahuvrîhi compounds ending in feminine words of the type of नदी or वधू always take the suffix क. *E. g.* बहुनदीकः ( °का *f.* ) । सवधूकः । सस्त्रीकः । इ० ।

---

अ or आ to form ओ or औ. *E. g.* बिम्ब+ओष्ठ=बिम्बोष्ठ or बिम्बौष्ठ; स्थूल+ओतु=स्थूलोतु or स्थुलौतु ।

Bahuvríhi compounds ending in ऋ also take the suffix क, while those ending in इन् take it necessarily in forming the Feminine base only. *E. g.* गतभर्तृका। सपितृकः। बहुधनिका (*Fem.* of बहुधनिन्).

Bahuvríhi compounds having a feminine noun ending in आ at the end, shorten that आ to अ, but they may take the suffix क in which case the shortening of the आ is optional. *E. g.* पुष्पितलतः or पुष्पितलतकः or पुष्पितलताकः। So also बहुभार्यः। तीक्ष्णदंष्ट्रकः। इ०।

In many Bahuvrîhi compounds the addition of the suffix क is optional, especially in those in which no change of the final is prescribed by rules given in Art. 24. *E. g.* उत्तमफलः or उत्तमफलकः। महायशाः महायशस्कः। But only व्याघ्रपाद्, सुगन्धिः, &c.

26. Adjectives (ending in any vowel or consonant except ऊ) when they are used as the first members of Karmadhâraya or Bahuvrîhi compounds and qualify a feminine noun, assume their crude (Masc.) base in the compound. This rule is not applicable in the case of adjectives used as nouns. *E. g.* चित्रगुः = चित्रा गौर्यस्य सः। युवजानिः = युवतिर्जाया यस्य सः। तत्स्त्री= सा स्त्री। महाचमूः = महती चमूः। महाचमूकः = महती चमूर्यस्य सः। Similarly बहुलक्ष्मीकः। ऊर्ध्वदृष्टिः। रूपवद्भार्यः। But ब्राह्मणीभार्यः, भीरुभार्यः, कान्ताद्वितीयः, &c.

27. A Bahuvrîhi compound may be used as an adverb by giving it the form of Neut. Acc. Sing. *E. g.* बहुविधम् (variously), सकम्पम् (tremblingly), &c.

## *EXERCISE VI.*

कस्मिंश्चित्सरसि गूढग्रीवो नाम कच्छपो वसति स्म। तस्य द्वौ गृध्रौ जीवितनिर्विशेषौ सुहृदावास्ताम्। तौ प्रत्यहं सरस्तीरमागत्य तेन सह पुण्याभिः कथाभिः सुखेन कालं नीत्वास्तमनकाले स्वनीडसंश्रयमकुरुताम्। गूढग्रीवोऽपि तेन साधुसमागमेन शास्त्रनिपुणो बहुश्रुतश्च संजातः। परं जातिस्वभावान्नित्यमधीरप्रकृतिरेवासीत्। अथ गच्छता कालेनानावृष्टिवशात् तत्सरः शनैः शनैः शोषमयात्। मृताश्च नानाविधा जलजन्तवः। गूढग्रीवोऽपि नष्टबान्धवजनः कथमप्यायुःशेषतया सरस एकदेशे कष्टेन प्राणान् धारयति स्म।

ततस्तद्दुःखदुःखितौ गृध्रौ तमाहतुः । सखे जम्बालशेषमेतत्सरः संवृत्तम् । तत्कथं भवतात्र जीवितुं शक्यमिति चिन्ताकुलमावयोर्हृदयम् । असह्यश्च पुनस्त्वत्सदृशेन चिरसुहृदा वियोगो भवेत् । तदेवंगते किं कुर्वः । तत्तयोर्वचनं श्रुत्वा गूढग्रीवोऽपि विषण्णमनाः साश्रुमुखस्तावाह । भो न मेऽधुनाशा जीवितं प्रति सर्वथा मंदभाग्योऽस्मि । तन्न भवद्भ्यां मद्धेतोर्विषादः कार्यः । न च स्वजीविते विरागः कर्तव्यः । केवलं स्मर्तव्योहं प्रियजनकथासु ।

ततस्य वचः श्रुत्वा तयोरेकतरः प्राह । वयस्य न त्वं धैर्यं त्यक्तुमर्हसि । विचिन्त्यतां कोऽपि जीवितरक्षणोपायो येनैतामपि महापदं तरसि । गूढग्रीव आह । सत्यमुदितं वयस्येन । परमस्मिन्महासंकटे न मे बुद्धिः प्रभवति । किं करोमि सर्वथा विवशोऽस्मि संजातः । तद्यदि भवद्भ्यां कश्चिदुपायो दृष्टो भवेद्रक्षयन्तामेते ममाल्पभाग्यस्य प्राणाः ।

ततोऽन्यतरेणोक्तम् । अस्ति तावदेक एवोपायः । इतो नातिदूरे प्रभूतजलं नीलोदं नाम सरो विद्यते तत्र त्वां नयावः । इदमत्र लघुकाष्ठं तिष्ठति । एवत्त्वया मध्यदेशे दन्तैः सुदृढमालम्ब्यताम् । आवां चैनत्कोटिभागयोर्गृहीत्वा त्वत्सहित मुद्धृत्य तत्सरो नयावः । परं त्वया मौनव्रतेन भवितव्यम् । नो चेत्काष्ठात्पतितः पञ्चत्वं गच्छेः । गूढग्रीव आह । एवं करोमि । न पुनर्मार्गे किमपि वचनप्रयोजनं स्यात् । बलवती च जीविताशा यया ग्रीवादिबन्धनमपि सह्यं भवेत् ।

अथ ते तथोच्चैरम्बरवर्त्मना गच्छन्तः कस्यचिन्महापुरस्योपरि प्राप्ताः । तत्र ये पौरास्ते तं कच्छपं तथा गृध्राभ्यां नीयमानमालोक्य सविस्मयमब्रुवन् । अहो चक्राकारं किमपि पक्षिभ्यां नीयते पश्यत पश्यतेति । एवं तेषां मिथः संवदतां महान्कोलाहलः संजातः । गूढग्रीवस्तूर्ध्वदृष्टिस्तान् विस्मयाकुलान् पौराननीक्षमाणः केवलं तं कोलाहलमशृणोत् । सहसैव चोपजातकुतूहलो नष्टप्रतिभो विस्मृतमित्रवचनो "भोः किमेष कोलाहल" इत्यर्धोक्ते काष्ठाद्भ्रष्टो वेगेन भूमौ निपतितः पौरैर्लगुडहस्तैर्व्यापाद्यत ।

रामः कमलपत्राक्षः पूर्णचन्द्रनिभाननः ।
तेजसादित्यसंकाशो यशसा वासवोपमः ॥
ते प्रभामण्डलैर्व्योम द्योतयन्तस्तपोधनाः ।
सारुन्धतीकाः सपदि प्रादुरासन्पुरः प्रभोः ॥
स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्न्यगारे ।
द्वित्राण्यहान्यर्हसि सोढुमर्हन् यावद्यते साधयितुं त्वदर्थम् ॥
अथार्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः ।
कुशः प्रवासस्थकलत्रवेशामदृष्टपूर्वां वनितामपश्यत् ॥

Thus did the wise Bibhîshana speak to Râvana:—O my brother, let Sîtá be sent back to the son of Das'aratha before Lanká is besieged by thousands of monkeys *who use their jaws*

*and nails as their weapons.* Let *the fair bodied one* be given back to *the elder brother of Lakshmana* before he crosses this ocean and kills numbers of our brave warriors. His shafts are truly *like thunderbolts in their force* and *resemble a powerful wind in thier speed.* Even if you were protected by demons you could not escape alive when struck by the missiles of Ráma *used with their spells.* Lankâ is *no doubt* surrounded by lofty fortress walls; it is guarded by brave demons at every entrance; and hence you think yourself to be *safe from any danger.* But walls and demons will lie low on the ground, when stones *without number* will be hurled against them by monkeys. You do not get sleep because, *O ten-necked one,* in bringing Sîtá here and placing her in the grove of As'oka, with *ugly female demons for her attendants,* you have in truth brought home a serpent *of deadly poison* and *of sharp fangs.* It is as it were a fire of *intense heat* and will be the cause of death to you and all who are infatuated like you. *O thoughtless one,* it is vain to hope for victory against this god *in human form.*

NOTES–जीवितनिर्विशेषौ=जीवितान्निर्विशेषौ 'as dear as life itself'. बहुश्रुतः = बहु श्रुतं यस्य सः ' very learned, well-informed.' अनावृष्टिवशात=Owing to drought. आयुः शेषतया=आयुषः शेषः(आयुःशेषः) तस्य भावः (आयुःशेषता) तया 'On account of having some life remaining.' चिरसुहृद्=चिरं सुहृद् । एवंगते—such being the case. सर्वथा—Wholly. मद्धेतोः (Gen.)—For my sake, on my account. नीलोदम्= नीलमुदकं यस्य तत् । मध्यदेशे = मध्ये देशे 'In the middle.' सुदृढम्—The prefix सु when prefixed to adjectives or adverbs has the sense of 'very.' त्वत्सहितम्= त्वया सहितम् 'Together with you'. अर्धोक्ते= उक्तस्यार्धम् (अर्धोक्तम्) तस्मिन् (Loc. Abs.). पूर्णचन्द्रनिभाननः—The words निभ, संकाश, नीकाश, प्रतीकाश, संनिकाश, उपम, &c are used only at the end of an Instr. Tap compound, but in dissolving the compound the word सदृश is substituted for them; thus चन्द्रनिभः = चन्द्रेण सदृशः । आदित्यसंकाशः । वासवोपमः । इ० । पुरः प्रभोः—Before the god Śiva. सोढुम्—To be patient, to wait. प्रवासस्थकलत्रवेशाम्—Dressed like a woman whose husband has left the house and is travelling abroad. *Let Sîtá be sent back*—प्रेष्यतां, निवर्त्यतां दाशरथाय मैथिली । *Before Lankâ is besieged &c.*—यावन्न लङ्कावरुध्यते तावत् । *Who*

*use their jaws &c.*—नखदंष्ट्रायुधाः। *Let the fair-bodied one &c.*—सुतनुरसौ प्रत्यर्प्यताम्। *Elder brother*–अग्रजन्मन्। *Like thunderbolts &c.*–वज्रसाराः शराः। *Resemble a powerfutl wind &c.*—वायुसमानवेगाः। *You cannot escape alive*—न जीवन् प्रतिमुच्यसे। *Missiles used with their spells*—मन्त्रप्रयुक्तान्यस्त्राणि। *No doubt*—असंशयम्। *Without number*—असंख्याः। *In bringing &c.*-should be rendered by using a present participle; thus सीतामत्रानयता त्वया सर्प एव गृहं प्रवेशितः। *With ugly female demons &c.*—विरूपराक्षसीपरिजना। *Ugly*—विरूप, विकृतरूप। *Cause of death*—मृत्युकारणम्। *Thoughtless one*—नष्टविवेकः। *In human form*—मनुष्यरूपः।

## VOCABULARY IV.

अकुतोभय *adj* Having no fear from any quarter, safe from any danger.

अधीर *adj*. Unsteady,impatient.

अनावृष्टि *f*. Drought.

अरुन्धती *f*. Wife of the sage Vasishtha.

अर्हत् *adj*. (Pres. part.) Worthy of respect.

अस्तमन *n*. setting of the sun.

आकुल *adj*. Full of, filled.

आदि *m*. The first.

आनन *n*.The face.

आशंसा *f*. Hope.

उपम *adj*. (At the end of a compound ) Like, resembling.

ऊर्ध्व *adj*. Upward, directed upwards.

कच्छप *m*. (०पी *f*.) A tortoise.

कलत्र *n*. A wife.

काष्ठ *n*. A piece of wood.

कुतूहल *n*. Curiosity.

कोटी *f*. End, extremity.A crore.

कोलाहल *m*. Noise, uproar.

गृध्र *m*. A vulture.

ग्रीवा *f*. The neck.

चक्र *n*. A wheel.

चतुर्थ *adj*. Fourth.

जन्तु *m*. A creature.

जम्बाल *m*. Mud or moss.

जाति *f*. Class, kind.

तपोधन *m*. An ascetic, a devotee.

दाह *m*. Heat, burning.

दुःखित *adj*. Distressed, pained.

नख *n*. A nail.

नष्ट *pp. adj*. Perished, lost.

नातिदूरे *adv*. Not very far off.

निपुण *adj*. Skilled in, full off.

निभ *adj*. (At the end of a compound) Like, resembling.

निर्विशेष *adj*. Without diffrence or distinction.

नीड *n*. A nest.

पत्र *n*. A leaf.

परिवृत *pp. adj*. Surrounded.

पण्य *adj*. Holy, pious.

पूर्ण *adj*. Full, complete.

पौर *m*. A citizen.

प्रतिभा *f*. Presence of mind, genius.

प्रदीप *m*. A lamp.

प्रबुद्ध *pp. adj*. Awakened.

प्रभूत *adj*. Abundant, ample.

प्रवासस्थ *adj*. Travelling.

प्रशस्त *adj*. Excellent, best.

प्राकारभित्ति *f*. A rampart wall, a fortress-wall.

प्रादुस् *Indecl*. Before the root अस् or भू means to appear, to be visible.

बन्धन *n*. Tying, fettering.

बान्धव *m*. A kinsman, a relative.

भवितव्य *Poten. part*. (Used impersonally) Should be.

भाग *m*. A part. A place.

भाग्य *n*. Luck, fortune.

भ्रष्ट *pp. adj*. Fallen from, dropped down.

मण्डल *n*. A circle. A ring.

मन्त्र *m*. A spell.

महित *adj*. Sacred, honoured.

मौन *n*. Silence.

लगुड *m*. A stick.

लम्ब् *vi*. ( लम्बते I. A. ) with आ *vt*. To take hold of, to rest on.

वनिता *f*. A woman.

वासव *m*. A name of Indra.

विधा *f*. A kind, sort.

वियोग *m*. Separation.

विराग *m*. Indifference, aversion.

विवश *adj*. Helpless.

विषण्ण *pp. adj*. Dejected, sad.

विस्मय *m*. Wonder.

वेश *m*. Dress, disguise.

व्योमन् *n*. The sky.

शक्य *Poten. part*. ( Used impersonally ) Possible.

शनैः *Indecl*. Gradually.

शय्या *f*. A bed.

शेष *m*. What remains behind, remainder.

शोष *m* Dryness.

श्रुत *n*. Learning.

संश्रय *m*. Taking shelter.

संकाश *adj*. ( At the end of a compound) Like, resembling.

संख्या *f*. Number.

सदृश *adj*. Like.

समान *adj*. Similar, like.

सहित or संहित *pp. adj*. Accompanied by, united.

सह्य *adj*. Bearable.

सार *m*. Strength, force. Essence, pith.

सुप्त *pp. adj*. Asleep.

सोढुम् *Infin*. ( fr. सह् ) To wait.

स्तिमित *adj*. Steady, motionless.

स्वभाव *m*. Nature.

स्मर्तव्य *adj*. Should be remembered.

## LESSON V.

## COMPOUNDS ( *Continued* ).

### I. DVANDVA, OR COPULATIVE COMPOUNDS.

**28.** There are two varieties of Dvandva, namely, the simple Dvandva and the collective Dvandva.

A simple Dvandva compound consists of words which, if not compounded, would be joined by the conjunction च (and). The Number of the compound word corresponds to the number of individuals or classes denoted by the nouns forming the compound. The Gender of the compound is that of its last member. *E. g.*

रामकृष्णौ ( *m.* Du. ) = रामश्च कृष्णश्च ।
रामलक्ष्मणसीताः (*f.* Pl. ) = रामश्च लक्ष्मणश्च सीता च ।
कामक्रोधलोभमोहमदमत्सराः ( *m.* Pl. ) = कामश्च क्रोधश्च इ० ।
पुष्पपत्रे ( *n.* Du. ) = पुष्पं च पत्रं च (a flower and a leaf).
पुष्पपत्राणि (*n.* Pl. ) = पुष्पाणि च पत्राणि च (flowers and leaves).

The च (and) in the above dissolution is the word added to express the relation in which the words are joined in a Dvandva compound.

**29.** Two or more adjectives may be joined to form a simple Dvandva compound, provided they qualify as many separate nouns or denote different classes of the noun qualified. *E. g.*

उदितास्तंगतौ ( चन्द्रसूर्यौ ) = उदितः ( चन्द्रः ) अस्तंगतश्च ( सूर्यः ) । Similarly वृद्धतरुणौ ( भीष्मार्जुनौ ) । उपकृतापकृतौ ( मित्रारी ) । शीतोष्णे ( जले ) = शीतं चोष्णं च शीतोष्णे । उत्तमाधममध्यमाः ( पुरुषाः ) = उत्तमश्चाधमश्च मध्यमश्च । इ० ।

**30.** In forming a Dvandva compound, the nouns denoting persons or things are joined in the order of their importance, the more important preceding the less important. Words expressive of actions or events should be joined in the order in which they take place. *E. g.* देवर्षिमानवाः, जन्ममरणे, । इ० ।

31. When nouns ending in ऋ and implying blood relationship or some learning form a simple Dvandva compound, the final ऋ of the preceding noun is changed to आ. *E. g.* मातापितरौ । होतापोतारौ । इ० ।

When the compound consists of the names of deities the final vowel of the preceding noun is lengthened. *E. g.* मित्रावरुणौ । अग्नीवरुणौ । अग्नीषोमौ । इ० ।

32. When a Dvandva compound is used to denote an aggregate of the individuals denoted by its members, it is called the collective Dvandva ( समाहारद्वन्द्व ). It is by itself singular and neuter, but may be used in dual or plural when two or more aggregates are mentioned. *E. g.*

पाणिपादम्=पाणी च पादौ च ( एतेषां समाहारः ) पाणिपादम् ।
सुखदुःखम्=सुखं च दुःखं च ( एतयोः समाहारः ) सुखदुःखम् ।
वधूवरम्=वधूश्च वरश्च ( एतयोः समाहारः ) वधूवरम् ( a pair of bride and bridegroom ), वधूवरे ( two pairs ), वधूवराणि ( many pairs ).
हस्त्यश्वरथपादातम्=हस्तिनश्च अश्वाश्च रथाश्च पादाताश्च ( एतेषां समाहारः ) हस्त्यश्वरथपादातम् ।

*Exceptions* :—The words अहन् and रात्रि form the collective Dvandva compound अहोरात्रः ( day and night ) which is Masculine. नक्तंदिवम्, रात्रिंदिवम् and अहर्दिवम् are Dvandva compounds used only as adverbs ( नक्तं च दिवा च । रात्रौ च दिवा च । अहनि च दिवा च ( day after day ).

33. The collective Dvandva is formed generally of words signifying insects, limbs of the body of an animal, parts of an army, animals or objects between which there is antipathy, and often of words in the plural signifying birds, beasts, trees, fruits, corn, grass, &c. *E. g.*

पाणिपादम् । यूकालिक्षम् । हस्त्यश्वम् । अहिनकुलम् । प्लक्षन्यग्रोधम् । रुरुपृषतम् । शुकबकम् । बदरामलकम् । अधरोत्तरम् । इ० । But प्लक्षन्यग्रोधौ । अश्ववडवौ । रथिकाश्वारोहौ । बदरामलके । अधरोत्तरे । इ० ।

34. When a collective Dvandva ends in a letter of the palatal class or द्, ष् or ह्, अ is added to it. *E. g.* वाक्त्वचम् । शमीदृषदम् । वाक्त्विषम् । छत्रोपानहम् । इ० ।

**35.** Following verses contain some special Dvandva-compounds:—

मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ ।
श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ पुत्रश्च दुहिता च ॥
दंपती जंपती जायापती भार्यापती च तौ ।
द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ॥

मातापितृ, मातरपितृ and प्रसूजनयितृ (*m.* Du. only)=father and mother, *i. e.* parents.

दंपति, जंपति, जायापति, भार्यापति (*m.* Du. only)=husband and wife.

द्यावापृथिवी *f.*, द्यावाभूमि *f.*, रोदसी *f.*, and रोदस् *n.* (all declined in the dual)=heaven and earth.

पितरौ=मातापितरौ । श्वशुरौ=श्वश्रूश्वशुरौ । पुत्रौ=पुत्रीपुत्रौ । So also भ्रातरौ=भ्रातृभगिन्यौ ।

In such cases पितरौ, श्वशुरौ, &c. are said to be एकशेष. *

2. AVYAYÎBHA'VA, OR ADVERBIAL COMPOUNDS.

**36.** An Avyayîbhâva compound is always an adverb. It is usually formed by joining an adverb or an indeclinable particle to another word. The indeclinable particle is to be considered the principal member of the compound, and denotes the sense of an oblique case, or the ideas of time, place, manner, degree, presence or absence, &c.

An Avyayíbhâva compound is indissoluble and must be partially explained by words not contained in the compound itself. The compound has always the form of the Neut. Acc. sing., except when it ends in अ, in which case it may optionally take the terminations of the Ablative; ‡ as बहिर्ग्रामम् or बहिर्ग्रामात् ।

---

*This एकशेष is allowed to be formed generally of common nouns denoting the males of a class, the females of which are signified by the same nouns taking the suffix ई or आ; *e. g.* ब्राह्मणौ=ब्राह्मणश्च ब्राह्मणी च । मयूरौ=मयूरश्च मयूरी च ।

‡ The ablative should, however, be used when the compound has the sense of that case.

EXAMPLES.

अधिहरि=हराविति ( in or on Hari ).

अधिस्त्रि=स्त्रिष्वधिकृत्य ( about women ), अध्यात्मम् । इ० ।

उपकुम्भम्=कुंभस्य समीपम् ( near the pot ), उपनदि, उपगिरि ।

आजलधि=आ जलधेः ( as far as the sea ), आजन्म, आशैलान्तम् ।

अभ्यग्नि=अग्निमभि
प्रत्यग्नि=अग्निं प्रति } ( towards or into the fire), अभिमुखम् ।

अनुवनम्=वनमनु ( near the forest ).

अनुरथम्=रथानां पश्चात् ( after the chariots ).

अनुगङ्गम्=गङ्गामन्वायतम् ( on or along the bank of the Ganges ).

अनुरूपम्=रूपस्य योग्यम् ( properly, fittingly ).

पारेगङ्गम् or पारेगङ्गात्=गङ्गायाः पारम् ( beyond the Ganges ).

मध्येगङ्गम्=गङ्गाया मध्यम् ( in the middle of the Ganges ).

अपत्रिगर्तम्=अप त्रिगर्तेभ्यः
परित्रिगर्तम्=परि त्रिगर्तेभ्यः } (away from the Trigarta country).

बहिर्ग्रामम्=ग्रामाद्बहिः ( outside the village ).

अन्तर्ग्रामम्=ग्रामस्यान्तः ( inside the village ).

अतिसीमम्=सीमानमतिक्रम्य ( beyond the limit ).

प्रतिदिनम्=दिने दिने ( every day ), प्रतिपर्वम् । इ० ।

प्रत्यक्षम्=अक्ष्णोः समीपम् ( before one's eyes or in one's presence ).

सतृणम्=तृणमप्यपरित्यज्य ( not omitting even grass ).

यावदवकाशम्=यावानवकाशस्तावान् ( as much as the space or time would allow ).

परोक्षम्=अक्ष्णोः परम् ( behind, or in one's absence ).

समक्षम्=अक्ष्णोः समीपम् ( before, in front of ).

यथाक्रमम्=क्रममनतिक्रम्य ( in order, according to the order ).

यथापूर्वम् ( as before ), &c.

**37.** The following changes of final syllables take place in Avyayîbhâva compounds:—

(*a*) Long vowels are shortened, ए and ऐ are changed to इ, and ओ and औ to उ. *E. g.* अनुगङ्गम्, अधिस्त्रि, उपवधु, उपगु, प्रतिनु, उपद्यु, &c.

(*b*) Masculine and Feminine nouns ending in अन् drop their final न् and Neuter ones do so optionally. *E. g.* अध्यात्मम्, उपसीमम्, उपचर्मम् or उपचर्म, &c.

(c) The words दिव्, दिश्, अक्षि and पथिन् become दिव, दिश, अक्ष and पथ; नदी and गिरि become नद and गिर optionally. *E. g.* प्रतिदिवम्, प्रतिदिशम्, प्रत्यक्षम्, अनुपथम्, अधिगिरम् or अधिगिरि, उपनदम् or उपनदि, &c.

## *EXERCISE V.*

अनुविन्ध्यं वर्तते तत्तपोवनं यत्र यथाकालं वर्षति पर्जन्यो नक्तंदिवं सुरभयो वायवो वहन्ति गोव्याघ्रं च विस्मृतवैरमेकत्र क्रीडति। मीनमकरदर्दुरादिपरित्यक्तं सरो वीक्ष्य सचिन्ताः सर्वे बका अभवन्। तस्मिन्नाश्रमे देवर्षिमानवानां रम्याः कथाः शृण्वन्तः सुखेन कालमयापयन्। प्रत्यहं यथाविधि वैश्वानरं जुहुधि वेदानधीष्व मातरपितरौ गुरुं च सेवस्व। प्राप्तहस्तपादग्रीवादिबन्धनास्ते पारेवारिधि राजपुरुषैरनीयन्त।

मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः।
तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपंक्तिम्।
वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥
मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम्।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति॥
गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥
त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः शकुन्तला मूर्तिमती च सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिः॥
करकमलवितीर्णैरम्बुनीवारशष्पै—
स्तरुशकुनिकुरङ्गान्मैथिली यानपुष्यत्।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्तरोद्भेदयोग्यः॥
अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम्॥
यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात्।
पारेपरार्धं गणितं यदि स्याद्गणेयनिःशेषगुणोऽपि स स्यात्॥

Benares is situated *on the bank of the Ganges* where many Hindus go *every year* on a pilgrimage.

The king went ahunting and killed *tigers, wolves, bears and other wild beasts.*

*The lion and the ass,* travelling *outside the town* were one day caught in a trap.

*Râma, Lakshmana and Sîtâ* banished by Das'aratha dwelt in a hut *on the mountain.*

A bow to the creator of *the three worlds* and *things movable and immovable* ( therein ) !

Teachers explain theory to their pupils *according to their ability* and *at the proper time.*

The two sons of *S'iva and Párvatí* are *Ganapati and Kártikeya.*

During the first *ten days* of Jyeshtha people bathe early *every day* in rivers and visit *every temple.*

I saw *a male and female Kinnara* roaming at will *near the lake.*

*Notes.* अनुकनखलम्=कनखलस्याद्रेः समीपे 'Near mount Kanakhala.' सगरतनयस्वर्गसोपानपंक्तिम्—In which the sons of Sagara found a flight of steps to heaven. The hundred sons of Sagara burnt by the curse of the sage Kapila were saved by Bhagîratha with the water of the Ganges. प्रतिवातम्=वातं प्रति *i. e.* वातस्याभिमुखम् 'Towards or against the wind.' कोऽपि=अनिर्वाच्यः 'Indescribable.' पारेपरार्धम्=परार्धस्य पारम् 'Beyond परार्ध'. *On a pilgrimage*—यात्रायै । *Caught in a trap*—कूटयन्त्रगृहीतौ । *Of things movable and immovable*—चराचराणां भूतानाम् । *At proper time*—यथाकालम् । *A male and a female Kinnara*—किन्नरौ ।

## VOCABULARY V.

अवतीर्ण *pp. adj*. Descended.

असंस्थित *adj*. Restless, confused

आद्य *adj*. First, foremost.

उद्भेद *m*. Breaking. Opening.

ऋक्ष *m*. A bear.

कनखल *m*. Name of a mountain.

किन्नर *m*. (री *f*.) A kind of mythical demigods, with the body of man and the head of horse. They were singers and musicians to gods.

कुरङ्ग *m*. ( ॰गी *f*. ) A deer.

कुश *m*. A kind of grass.

कूटयंत्र *n*. A trap, a snare.

केतु *m*. A flag, a banner.

क्षम *adj*. Fit, sufficient.

गणना *f*. Counting.

गणित *n*. Mathematics.

गणेय *adj.* What may be counted.
चक्ष् *vt.* With वि and आ To explain.
चर *adj.* Movable.
चीनांशुक *n.* A silken cloth.
जह्नु *m.* Name of a king.
ज्येष्ठ *m.* The third lunar month.
तुल्य *adj.* Like, similar, equal.
दर्दुर *m.* A frog.
देवतायतन *n.* A temple.
द्रव *m.* Juice, a fluid substance.
धीवर *m.* (०री *f.*) A fisherman.
निष्कारण *adj.* Without a cause, causeless.
निःशेष *adj.* Without a remainder, all, entire.
नीवार *m.* Rice growing wild or without cultivation.
पङ्क्ति *f.* A flight(of steps), a line.
परार्ध *n.* The number represented by 100,00,00,00,00,00,00, 000 or thousand crore crores.
पश्चात् *Indecl.* Behind.
पिशुन *adj.* Slanderous, wicked, betraying.
प्रतिपत्ति *f.* Understanding, knowledge.
प्रत्यवहार *m.* Universal destruction.
प्रस्तर *m.* A stone.
प्राग्रसर *adj.* Foremost, first.
बक *m.* Crane.
मकर *m.* ( ०री *f.* ) A crocodile, a shark.
मानव *m.* A man, a human being.
मान्य *adj.* Worthy of respect.
मीन *m.* A fish
मूर्तिमत् *adj.* Incarnate, embodied.
मृगया *f.* Hunting, a chase.
यात्रा *f.* Pilgrimage.
योग्य *adj.* Fit, able.
लुब्धक *m.* A hunter.
वाच्य *n.* Blame, censure.
वात *m.* Wind.
वारिधि *m.* An ocean.
विकार *m.* Excitement, agony.
वितीर्ण *pp. adj.* Given.
विधि *m.* A rite, a ceremony, performance.
विहित *pp.adj.* Done, carried out.
वृक *m.* ( ०की *f.* ) A wolf.
वृत्ति *f.* Living, occupation.
वैर *n.* Enmity.
वैरिन् ( ०णी *f.* ) An enemy.
वैश्वानर *m.* Fire.
शकुनि *m.* A bird.
शष्प *n.* Young grass.
शास्त्र *n.* Theory.
सगर *m.* Name of a king.
सत्क्रिया *f.* Virtue, righteousness.
सन्तोष *m.* Satisfaction.
समाप्ति *f.* Completion, finishing.
संपृक्त *pp. adj.* Blended, united.
सर्ग *m.* Creation.
साधन *n.* A means, an expedient.
सुलभ *adj.* Attainable, available.
सोपान *n.* Stairs, steps, a ladder.
स्थिति *f.* Preservation.
स्वैर *adj.* Wanton, unrestrained *adv.* At will.

# LESSON I.

## COMPOUNDS ( *Continued.* )

### MISCELLANEOUS.

38. The formation of certain Gen. Tatpurusha compounds is not allowed in Sanskrit.

(*a*) The Gen. Tatp. must not be formed to express comparison or distinction. Thus we must say नृणां श्रेष्ठः। पान्थानां शीघ्रतमः।

*N. B.* When such compounds as नरश्रेष्ठ, नरोत्तम, &c. occur, they are dissolved as Loc. Tatp. as नरेषु श्रेष्ठः or उत्तमः &c.

(*b*) Ordinal numerals and abstract nouns are generally not allowed to stand as principal members in a Gen. Tatp. Thus we must say छात्राणां पञ्चमः, काकस्य कार्ष्ण्यं &c.

(*c*) Derivative words ending in अक and तृ and showing agent, cannot form the principal members of a Gen. Tatp. with the object of the action as the subordinate member. *E. g.* अपां स्रष्टा, पुरां भेत्ता, लतानां नर्तकः, ओदनस्य भोजकः, इ०। But काव्यनायकः, ग्रामसेवकः, गृहमूषकः, &c. ( Here काव्य, ग्राम, गृह, &c. are not the objects of the actions of which नायक, सेवक, मूषक &c. are the agents ).

*Exceptions* :—The words याजक, पूजक, परिचारक, अध्यापक, भर्तृ ( husband, master ) and some others, and also words ending in अक indicating a profession may stand as the last member of a Gen. Tatp. *E. g.* ब्राह्मणयाजकः। देवपूजकः। राजपरिचारकः। वेदाध्यापकः। लोहकारकः ( a blacksmith )। संदेशहारकः ( a messenger )। इ०।

(*d*) A derivative noun denoting action can form a Gen. Tatp. with the words denoting either the agent or the object of the action, but when in a sentence both are mentioned neither must be compounded. ( This rule is not very strictly observed in classical literature ). *E. g.*

गवां दोहः = गोदोहः। पयसः पानम् = पयःपानम्। वचनस्योक्तिः = वचनोक्तिः। इ०।

गोपानां दोहः=गोपदोहः। वत्सस्य पानम्=वत्सपानम्। ब्राह्मणस्योक्तिः= ब्राह्मणोक्तिः। इ०।

But गोपैर्गवां दोहः। वत्सेन पयसः पानम्। ब्राह्मणेन वचनस्योक्तिः। सूर्येण जलस्य शोषः। वायुना तरूणां भङ्गः। ब्रह्मणा जगतः कृतिः। इ०।

39. In some Tatp. compounds the original case terminations of the subordinate members are retained. This is also the case in some Bahu. compounds. Such compounds are called अलुक् तत्पु० or बहु०.

तृतीया (अलुक्) = जनुषान्धः। आत्मनापञ्चमः। इ०।
चतुर्थी ,, = आत्मनेपदम्। परस्मैपदम्।
पंचमी ,, = स्तोकान्मुक्तः। दूरादागतः। कृच्छ्राल्लब्धम्।
षष्ठी ,, = वाचस्पतिः। दिवस्पतिः। मातुःस्वसा or °ष्वसा। पितुःस्वसा or °ष्वसा। विशांपतिः। अपांपतिः। दास्याःपुत्रः। इ०।
सप्तमी ,, = युधिष्ठिरः। गेहेशूरः। इ०।
अलुक्बहु० ,, = उरसिलोमा। कंठेकालः। वाचोयुक्तिः। इ०।

40. Prefixes having the sense of nouns or adjectives can be used as first members of Tatpurusha compounds. They are either (*a*) principal members or (*b*) subordinate members in those compounds. When subordinate they are adjectival to the following nouns, but when principal they govern the case of the following nouns, and the compounds themselves are generally adjectival. *E. g.*

(*a*)

अति—अतिमालः = अतिक्रान्तो मालाम् (surpassing a garland). अत्यादित्यम्। अतिप्रमाणा। अतिमानुषः। अतीन्द्रियः। इ०।
अनु—अनुरूपः = अनुगतो रूपम्। अनुगुणः। अन्वर्था। इ०।
निस् or निर्—निष्कौशाम्बिः = निष्क्रान्तः कौशाम्ब्याः। निर्वनः। इ०।
प्र—प्राह्णः = प्रथमो भागोऽह्नः। प्रदोषः। प्रपितामहः = प्रगतः पितामहात्। प्रपौत्रः। इ०।
वि—विलक्षणः = विगतो लक्षणात्। विरथः = विरहितो रथेन। विप्रियम् = प्रियाद्विभिन्नम्। विपक्षः। इ०।

(*b*)

अति—अतिवेगः=अतिशयितो वेगः। अत्याशा। इ०।
अधि—अधिराजः=अधिको राजा। अधिदेवता=अधिष्ठिता देवता। अधिपतिः। इ०।
अप—अपशब्दः=कुत्सितः शब्दः। अपमार्गः=अपकृष्टो मार्गः। इ०।
उप—उपपदम्=उपगतं पदम्। उपवनम्। इ०।
प्र—प्राचार्यः=प्रगत आचार्यः। प्रकोपः=प्रकृष्टः कोपः। प्रजागरः। इ०।
प्रति—प्रतियोधः=प्रतिकूलो योधः। प्रतिभटः। प्रतिबलम्। प्रत्युत्तरम्=प्रतिगतमुत्तरम्। प्रतिच्छाया। इ०।

Prefixes compounded with adjectives have an adverbial sense. *E. g.* आरक्तः=ईषद्रक्तः। आपाण्डुः। अतितेजस्वी=अत्यन्तं तेजस्वी। अतिमानी। प्रतनुः=प्रकृष्टं तनुः। प्रचण्डः। परिपाण्डु=परितः पाण्डु। पर्युत्सुकः। इ०।

41. Prefixes having the sense of adjectives may form the first members of Bahuvrîhi compounds, of which we give below some typical examples :—

अधि—अधिगुणः=अधिका गुणा यस्य सः। अधिश्रीः। इ०।
अप—अपभयः=अपगतं भयं यस्य सः। अपार्थः। इ०।
अव—अवमुखः=अवनतं मुखं यस्य सः।
उत्—उदग्रः=उन्नतमग्रं यस्य सः। उन्मुखः। उत्कण्ठः। उन्मनाः। उच्छृङ्खलः। उत्पक्ष्म (नयनम्)। उदर्चिः। उदायुधः। उन्निद्रः। इ०।
निर् or निस्—निर्मलः=निर्गतो मलो यस्मात् सः। निर्भयः। निर्धनः। इ०।
परा—परासुः=परागता असवो यस्य सः। इ०।
प्र—प्रगुणः=प्रकृष्टा गुणा यस्मिन् सः। प्रच्छायः। प्रबलः। प्रवयाः=प्रगतं वयो यस्य सः। प्राञ्जलिः=प्रबद्धोऽञ्जलिर्येन सः। प्रपर्णः=प्रपतितानि पर्णानि यस्य सः। इ०।
वि—विमलः=विगतो मलो यस्मात् सः। विनिद्रः। विकलः। विमुखः। विजनः। विधवा। विफलः। विरसः। इ०।

42. There are some Tatpurusha compounds, (called मध्यमपदलोपिन् in Marathi) in which the first members are equivalent to compound adjectives. *E. g.* शाकपार्थिवः=शाकप्रियः पार्थिवः 'A king fond of an era;' देवब्राह्मणः=देवपूजको ब्राह्मणः 'A

Brâhmana, who worships the gods;' छायातरुः=छायाप्रधानस्तरुः'A shady tree;' विषान्नम्=विषमिश्रमन्नम् । अग्निरथः=अग्निप्रेरितो रथः । इ० । ( These compounds are called शाकपार्थिवादि ).

43. Some irregular Tatpurusha and Bahuvrîhi compounds are called पृषोदरादि. *E. g.* पृषोदरः (पृषद् + उदर )=पृषदुदरं यस्य सः 'having a checkered belly;' बलाहकः ( वारि + वाहक )=वारीणां वाहकः । कोविदः ( ओकस् + विद )=ओकसो विदः । पश्चार्धः ( अपर+अर्ध ) =अपरश्चासावर्धश्च । कर्तुकामः or ०मनाः=कर्तुं कामो मनो वा यस्य सः । इ० ।

44. When a compound does not fall under any of the principal kinds of compounds mentioned before, it is called सुप्सुप्समास or केवलसमास by native Grammarians. *E. g.* अद्यश्वः =अद्य वा श्वो वा । नैकधा 'In many ways;' भूतपूर्वः=पूर्वं भूतः । श्रुतपूर्वा =पूर्वं श्रुता । विग्रहसन्धौ=विग्रहे वा सन्धौ वा । त्रिःसप्तकृत्वः 'Twenty-one times,' &c.

## *EXERCISE VI.*

ततो महत्येव प्रत्यूषे दास्याःपुत्रैः शकुनिलुब्धकैर्वनग्रहणकोलाहलेन प्रतिबोधितोऽस्मि । आगन्तुकतयाश्रुतपूर्व आवाभ्यामेष वृत्तान्तः । कश्चित्पुरुष उद्वाहुः सिन्धोस्तीरे स्निग्धच्छायातरुष्वरण्येषु तपोऽतप्यत ।

याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ।
भव पितुरनुरूपस्त्वं गुणैर्लोककान्तै-
रतिशयिनि समाप्ता वंश एवाशिषस्ते ॥
निर्वनो वध्यते व्याघ्रो निर्व्याघ्रं छिद्यते वनम् ।
तस्माद्व्याघ्रो वनं रक्षेद्वनं व्याघ्रं च पालयेत् ॥
तव सुचरितमङ्गुलीय नूनं प्रतनु ममेव विभाव्यते फलेन ।
अरुणनखमनोरमासु तस्याश्च्युतमसि लब्धपदं यदङ्गुलीषु ॥
अतोऽत्र किंचिद्भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥
इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति ॥
दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो
निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥

कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥

The great city of Ayodhyâ, situated *on the banks of the Sarayú*, was formerly ruled by *excellent kings*. The wide streets of the city were *well laid-out* and watered *every day*. In various places, beautiful, *many-coloured* arches were constructed and banners *beyond number* were fluttering high in the air. The city was surrounded by extensive gardens frequented by men, women and children *every evening*. Tributary princes assembled *every year* to pay their tribute to Das'aratha, *the king of kings* who protected them and made them *stronger* and *fearless*. The king was advised by ministers who were *very wise* and *intelligent*. *Excellent teachers* taught the youths of the city who thereby became *fond of religion* and *humble through their modesty*. Sacrificial fires burnt daily *with high flames* and with smoke *smelling of ghee*. Vedic blessings were pronounced in high tones by Brâhmanas *with uplifted hands*. All the people were *free from disease and adversity*, and never died an *untimely death*.

*Notes*:—तपोऽतप्यत—The verb अतप्यत governs the cognate object तपस् and, though passive in form, is active in sense. याञ्चा मोघा वरमधिगुणे &c.–A request made to a noble person is better even when refused than a request made to a low person and granted by him. अनुरूपः = Worthy, like. लोककान्तैः = लोकानां कान्तैः 'Loved by the people.' बहुक्षमा—Possessed of much patience. चतुर्दिगीशाः = चतसृणां दिशामीशाः (This is an instance of a three-membered Tatpurush compound. As चतुर्दिश is not intended to signify an aggregate, it is necessary to dissolve the above compound as त्रिपदतत्पुरुष). दिशां बलिम् = दिग्भ्यो बलिम्. The Gen. or the Loc. are sometimes used in place of the Dat. *Well laid-out*—सुविभक्ताः । *Many-coloured arches* &c.—विचित्राणि तोरणानि न्यबध्यन्त । *Were fluttering*—व्याधूयन्त । *Every evening*—प्रतिसायम् । *King of kings*—अधिराजः । *Stronger* and *fearless*—प्रबलानपभयान्

*Very wise* and *intelligent* कोविदैः प्रधीभिः । *Excellent teachers*—प्राचार्याः । *Fond of religion*—प्रियधर्माणः । *Free from disease* and *adversity*—निरातङ्का निरापदः । *Untimely death*-अकालमृत्युं नाच्छैन् ।

## VOCABULARY VI.

अकाल *m.* Improper time. *adj.* Untimely.

अङ्गुली *f.* A finger.

अतिशायिन् *adj.* (*f.* °नी) Excelling, pre-eminent.

अधिगुण *adj.* Noble, superior in merit.

अधिश्री *adj.* Superior in beauty, wealth or majesty.

अनुमत *pp. adj.* Assented to.

अरुण *adj.* Red.

आगन्तुक *m.* A guest, a stranger

आस्पद *n* A place, an abode.

ईश *m.* A lord, a master.

उदायुध *adj.* With uplifted weapons.

उद्बाहुः *adj.* With arms uplifted.

उपहार *m.* Tribute, a present.

किरीटिन् *m.* A name of Arjuna.

कोविद *adj.* Learned, wise.

चापल *n.* Inconsiderate conduct, unsteadiness.

च्युत *pp. adj.* Dropped, fallen.

तप् *vt.* (तप्यते *pass*). To perform or practise (penance.)

दास्याःपुत्र *m.* An abusive term.

द्विजाति *m.* A Brâhmana.

नरकरिपु *m.* A name of Krishna.

निर्धनता *f.* Poverty, indigence.

निरातङ्क *adj.* Free from disease or fear.

निरापद् *adj.* Free from adversity or misfortune.

निर्बुद्धि *adj.* Unruly, criminal.

निर्वन *adj.* Gone out of the forest.

निर्विण्ण *adj.* Despondent, depressed, disgusted.

निर्वेद *m.* Despondency, disgust.

निस्तेजस् *adj.* Destitute of fire or spirit, powerless.

परिगत *pp. adj.* Filled, surrounded.

परिभव *m.* Humiliation, disrespect, disgrace. Discomfiture.

पिनाक *m.* The bow of S'iva.

पिहित *pp. adj.* Covered, filled with.

प्रतनु *adj.* Very small.

प्रतिबोधित *pp. adj.* Roused, awakened.

प्रत्यूष *m.* Daybreak, dawn.

प्रभृति *m.* Beginning, the foremost. *Indecl.* Since (with the Abl.)

बलि *m.* An oblation, a gift.

मदन *m.* The God of love.

मेदस् *n.* Fat, marrow.

मनोरम *adj.* Charming, beautiful.

मनुज *m.* A man.

मोघ *adj.* Futile, vain.

मन्त्रोक्त *adj.* Vedic.

याच्ञा *f.* A request.

रहस्य *n.* A secret.

ललित *adj.* Beautiful.

वच् *vt.* With प्रति To answer, to speak in reply.

वध् *vt.* To kill (used in the passive).

वनग्रहण *n.* Surrounding a forest and stopping all egress.

विभावय *vt.* (Caus. of वि-भू) To see, to guess, to imagine.

विस्तीर्ण *adj.* Extensive, wide.

वैतान *adj.* Sacrificial.

समाप्त *pp. adj.* Finished, exhausted.

समाश्रित *pp. adj.* Frequented, haunted.

सामन्त *m.* A tributary prince.

साय *m.* Evening.

सार्धम् *Indecl.* With (with the Instr.).

सिन्धु *m.* The Indus. *f.* A great river.

सुचरित *n.* Merit, good fortune.

सुविभक्त *adj.* Well laid-out.

स्निग्ध *adj.* Pleasing.

हार्य *adj.* Capable of being won over or attracted.

हृ *vt.* With सम् and आ To collect, to bring together.

## *LESSON VII.*

## UPAPADA COMPOUNDS.

45. There is a species of Tatpurusha compounds in which nominal bases, formed directly from roots by certain suffixes, take the place of principal members, the bases being generally not capable of existing independently of the compounds. The subordinate members in these compounds may either be nouns in oblique cases, or they may be prefixes or adverbs. Such compounds are known as कृदन्ततत्पुरुष or उपपद-तत्पुरुष, and some of them are अलुक् as well. They are mostly adjectives or proper nouns. We give below some of the rules of the formation of such compounds.

(1) The root may generally be added on to the subordinate member without any change, except that roots ending in short इ, उ or ऋ take त् after them, and roots ending in आ, ए, ऐ, and ओ change them to अ (*f.* आ). *E. g.*

*जलमुक् ( crude base जलमुच् )=जलं मुञ्चतीति । सर्वशक् । अहिभुक् ( ०ज् ) । विश्वसृट् ( ०ज् ) । काष्ठतट् ( ०क्ष् ) । मृगद्विट् ( ष् ) । कामधुक् ( ०दुह् ) । मित्रध्रुक् or ध्रुट् ( ०द्रुह् ) । शास्त्रविद् । गोत्रभिद् । सम्राट् ( ०ज् ) । क्रव्याद् । मर्मस्पृक् ( ०श् ) । ग्रामणीः । वर्षाभूः । स्वयंभूः । वीरसूः । विश्वजित् । कार्यकृत् । सोमपः=सोमं पिबतीति । धनदः । बहुप्रदः । द्वाःस्थः । सामगः=सामं गायतीति । इ० ।

*Exceptions*:—The root भज् is changed to भाज्, जन् to ज (*f.* जा), गम् to ग (*f.* गा), हन् to ह (*f.* हा) or घ्न (*f.* घ्नी) or it may remain unchanged (the Fem. base ending in घ्नी), ध्यै to धी and धा to धि *m.* (the root धा being used in its passive sense). *E. g.*

सुखभाक् ( ०ज् )=सुखं भजतीति । पापभाक् । इ० ।
अनुजः=पश्चाज्जायत इति । पूर्वजः । †सरोजम् । इ० ।
अध्वगः=अध्वानं गच्छतीति । अनुगः=पश्चाद्गच्छतीति ।
शत्रुहः=शत्रुं हन्तीति । शत्रुघ्नः । तमोपहः । वृत्रहा (*f.* घ्नी) ।
शुद्धधीः=शुद्धं ध्यायतीति । प्रधीः=प्रकृष्टं ध्यायतीति ।
जलधिः *m.*=जलं धीयतेऽस्मिन्निति । इषुधिः । इ० ।

(2) The termination अ is added to the following roots and to some others, before which the ending vowel takes its Guna substitute :—

अर्ह्, रुह्, चर्, धृ, हृ, सृ, and शी. *E. g.* पूजार्हः (*f.* र्हा) । शिरोरुहः । तटरुहा । †वनचरः । सहचरी । जलधरः । विद्याधरः (*f.* री) । महीधरः (also महीध्रः) । अंशहरः । संदेशहरः (*f.* ०रा) । †अग्रसरः (*f.* ०री) । पुरःसरः । उत्तानशयः (*f.* ०या) । गुहाशयः । †हृच्छयः । इ० ।

(3) When the first member signifies the object of the action denoted by the root, the latter is often changed to that form of it which it takes in the Causal, and अ (*f.* ई) is then added to it. *E. g.* कुम्भकारः=कुम्भं करोतीति । भारवाहः । वेदाध्यायः । तन्तुवायः । सूत्रधारः । कर्णधारः । भूपालः । इ० ।

---

* For the declension of many of the words ending in consonants see Lessons I and II of the Second Sanskrit Course Part I.

† When the subordinate member of an Upapada compound is in the Loc. case, the case-termination is frequently retained and the compound made अलुक्. *E. g.* सरसि-जम् । वनेचरः । हृदिशयः । पङ्केरुहम् । दिवि-षद् । दिविष्ठः । अग्रे-सरः । इ० ।

*Exceptions*:—The root कृ is changed to कर (*f.* री) when such a compound as the above denotes, in addition, the idea of cause (हेतुः), habit (शीलं) or submission (आनुलोम्यं), or when it is preceded by the words दिवा, निशा, प्रभा, भास्, अन्त, किं, चित्र, क्षेत्र, अहन्, कर्मन्, and some others. *E. g.* शोककरः = शोकं करोति (= शोकस्य हेतुः)। हर्षकरः। अर्थकरी (विद्या)। प्रियकरः = प्रियं करोतीति शीलमस्य। वचनकरी। यशस्करम्। दिवाकरः। भास्करः। किंकरः। अहस्करः। कर्मकरः। इ०।

(4) The termination इन् is added to the root after changing it as in the Causal, when habit (शीलं), comparison (उपमानं), past time (भूतार्थः), or frequency of the action (आभीक्ष्ण्यं) is to be indicated by the compound. *E. g.* परोपकारी = परेषामुपकरोति तच्छीलः। जलशायी। फलाशी। अनुजीवी। उष्णभोजी। विमृश्यकारी। गजगामिनी = गज इव गच्छतीति। उष्ट्रक्रोशी। कोकिलभाषिणी। सोमयाजी = सोमेन इष्टवान्। पुरुषघाती। मधुपायी = पुनःपुनर्मधु (मद्यं) पिबतीति। अक्षद्वेषी। इ०।

(5) Causals and roots of the 10th Conjugation generally take the suffix अन (*f.* अना). *E.g.* मधुसूदनः, शत्रुनन्दनः, वंशभूषणः, जनार्दनः, शत्रुतापनः, मुखवासनः, कुलदूषणः, । इ०।

These verbal forms ending in अन can often be used by themselves. *E. g.* नन्दनः, दमनः, वर्धनः, रमणः, &c. Hence the above compounds may be dissolved as षष्ठीतत्पुरुष or उपपदतत्पुरुष.

(6) The indeclinables सु and दुः are compounded with many roots, which then have a passive sense. In these cases the vowels of roots are generally gunated (except when they are penultimate prosodially long vowels), and the suffix अ (*f.* आ) is added. *E. g.* सुलभः = सुखेन लभ्यत इति, दुर्लभम् = दुःखेन लभ्यत इति। सुकरः, दुष्करः। स्वापः, दुरापः। सुवहः, दुर्वहः। सुसहः, दुःसहः। सुतरः, दुस्तरः। सुगमः, दुर्गमः। सुबोधः, दुर्बोधः। इ०।

(7) The root दृश् is compounded with pronouns which are then slightly modified. The root remains as it is or changes to दृश (*f.* ०शी) or दृक्ष (*f.* ०क्षी) and has a passive sense. *E. g.* तादृक् (crude b. तादृश्) or तादृशः or. तादृक्षः = स इव दृश्यत इति। Similarly मादृक्, त्वादृक्, ईदृक्, एकादृक्, कीदृक्, यादृक्, एतादृक्, अन्यादृक्. (Also सदृक् or सदृश = समानो दृश्यत इति)।

46. The following are some of the irregular Upapada-compounds, including अलुक् :—

शोकापनुदः = शोकमपनुदतीति ( removing sorrow ); स्तम्बेरमः = स्तम्बे रमत इति ( an elephant ); कर्णेजपः ( a back-biter ); भयंकरः; प्रियंकरः; फलेग्रहिः = फलानि गृह्णातीति; आत्मंभरिः=आत्मानं बिभर्तीति ( selfish, greedy); स्तनंधयः; अभ्रंलिहः; विधुंतुदः ( the demon Râhu); अरुंतुदः=अरुर्मर्म तुदतीति ( striking on the wounded or sore part ); ललाटंतपः=ललाटं तपतीति ( burning the forehead ); प्रियंवदः; द्विषंतपः or परंतपः = द्विषन्तं or परं ( शत्रुं ) तापयतीति (one harassing or subduing his enemies ); वाचंयमः=वाचं नि-यच्छति व्रतेनेति; पुरंदरः= पुरं दारयतीति; सर्वंसहा ( the earth ); सर्वंकषः ( destroying all ); कूलंकषा; कामदुघा=कामान् दुग्ध इति । विश्वंभरा or वसुंधरा (the earth); पतिंवरा=पतिं वृणीत इति ( a young woman going to choose a husband ); अरिंदमः ( one who subdues his enemies ); विश्वपाः= विश्वं पातीति ( protecting all ); शङ्खध्माः; ऋत्विक्—ऋतौ यजतीति; रात्रिंचरः; हृदयंगमः; पश्यतोहरः ( a robber ); शोभनमानी = शोभनं मन्यत इति ( one who considers anything beautiful ); पंडितंमन्यः or पण्डितमानी=आत्मानं पण्डितं मन्यत इति ( one who considers himself a learned man ); भुजगः or भुजंगः ( *f.* ०गी ) or भुजंगमः ( *f.* ०मा )=भुजेन ( कौटिल्येन ) गच्छतीति ( one going crookedly, *i. e.* a serpent ); विहगः or विहंगः or विहंगमः = विहायसा गच्छतीति ( one going through the air, *i. e.* a bird ); तुरगः or तुरंगः or तुरंगमः = तुरेण ( त्वरया ) गच्छतीति ( a horse ); प्लवगः or प्लवंगः or प्लवंगमः=प्लवेन गच्छतीति ( going jumpingly, *i. e.* a monkey ), &c.

*N. B.* For the declension of Upapada compounds ending in आ, ई or ऊ and having a root for their final syllable, see Lesson VIII of the Second Sanskrit Course Part I.

## *EXERCISE VII.*

विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमाः ।
सा नीयमाना रुचिरान् प्रदेशान् प्रियंकरो मे प्रिय इत्यनन्दत् ।
पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत् ।
मालाकार इवारामे न यथाङ्गारकारकः ॥
अगारदाही गरदो मित्रध्रुक् पानपो द्विजः ।
रक्षेत्युक्तश्च यो हिंस्यात् सर्वे ब्रह्महभिः समाः ॥
अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन् ॥

कुसुमोत्खचितान् वलीभृतश्चलयन् भृङ्गरुचस्तवालकान् ।
करभोरु करोति मारुतस्त्वदुपावर्तनशङ्कि मे मनः ॥
मा नः कुले वैरकृत् कश्चिदस्तु राजाऽमात्यो मा परस्वापहारी ।
मित्रद्रोही नैकृतिकोऽनृती वा पूर्वाशी वा पितृदेवातिथीनाम् ॥
गजभुजंगमयोरपि बन्धनं शशिदिवाकरयोर्ग्रहपीडनम् ।
मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥
अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु ।
य उत्पलाक्षि प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥
म्लानस्य जीवकुसुमस्य विकाशनानि
संतर्पणानि सकलेन्द्रियमोहनानि ।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि ॥
किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥
आपूर्णश्च कलाभिरिन्दुरमलो यातश्च राहोर्मुखं
संजातश्च घनाघनो जलधरः शीर्णश्च वायोर्जवात् ।
निर्वृत्तश्च फलैर्महिर्द्रुमवरो दग्धश्च दावाग्निना
त्वं चूडामणितां गतश्च जगतो यातश्च मृत्योर्वशम् ॥

O Lord of men ! how is it that you are contented to live in this forest on mere hunting ? How can you bear to see Bhîma sleeping on the ground, collecting fruits and roots and carrying heavy loads for us ? How can your heart be calm when you see Arjuna, your younger brother, the foremost of archers, becoming a wood-cutter and a water-bearer ? The two sons of Mádrî, possessing beautiful bodies, are doing low work for you in the absence of servants here. I, the daughter of Drupada, born in a high family and used to live in a beautiful palace, am required to go about in this forest on foot behind you. In your very presence I suffered intolerable insults from your enemies; and yet you were not provoked to manly action. Bearing the load of a thousand miseries, your are as unmoved as a heap of stones. The lions of the forest roaring like the clouds at all times, wicked demons hovering round at night, and serpents

living in holes—make the forest terrible to us living in a shed of leaves. Your brothers, who wore golden ornaments, have now their bodies made dark by dust. They who should ride decorated elephants, have not got even shoes. At one time they are scorched by the sun burning their foreheads, and at another time drenched by the clouds pouring showers of rain. The bravery of Arjuna, who pleased the Fire by offering him the Khândava forest, does no good to us in our present calamity. The strength of Bhîma, equal to that of thousand elephants, does not inspire terror in the hearts of your enemies, for you, playing dice, have not only lost your kingdom, but have, moreover, promised to dwell for twelve years in this forest. Your enemies have done you wrongs for which you want to oblige them. Being born a Kshatriya, you seem to have taken the vow of a sage.

NOTES.—पानपो द्विज. = A Brâhmana addicted to drink. जीवलोकः = This world of mortals. पूर्वाशी = पूर्वमश्नातीति। करस्थदर्भप्रणयापहारिषु=( अपहरन्ति तेऽपहारिणः ) करस्थानां दर्भाणां प्रणयेनापहारिणस्तेषु। गर्भपत्रम्=गर्भे ( गर्भस्थं ) पत्रम् 'The inmost leaf.' आपूर्णश्च कलाभिरिंदुरमलो यातश्च &c—The particle च, when repeated in two assertions, has the sense of 'no sooner than' or 'as soon as' equivalent to यावत्-तावत् in Sanskrit. Translate—No sooner is the bright moon full of all its digits, than it enters the mouth of Râhu, *i.e.* is eclipsed. *O Lord of men* = अधि-प। *Living on hunting*=मृगया+उपजीविन्। *Sleeping on the ground* = भूमिशयः । *Collecting* &c. = फलमूलाहरः। *Carrying* &c. = महाभारवाहः। *Water-bearer*=जलाहरः। *Possessing* &c. = सुरूपधरौ । *Doing low work* = नीचकर्मकरौ । *Born* &c. = महाकुलजा। *Used to live* &c. = रुचिरप्रासादवासिनी। *Going about on foot.* = पादचारिणी। *Manly action*=पुरुषकारः, पौरुषम्। *Bearing* &c.= विपत्सहस्रभारधरोऽपि शिलासंघात इवाविकृतोऽसि। *Roaring like clouds*= घनगर्जिनः। *Living in holes* = बिलेशयाः। *Living in a shade of leaves*= पर्णशालानिवासिन्। *Who should ride* &c. = परिष्कृतगजाधिरोहिणः। *At one time—at another time*=कदाचित्—कदाचित्। *Pouring* &c.=प्रभूतधारावर्षिणो जलमुचः: *Fire*=हुताश, हुतभुज्, हुतवह, इ०। *Doing no good* &c.=अकिञ्चित्करं वीर्यम्। *Inspiring terror*=भयप्रद, भयावह, भयंकर, इ०। *Playing dice*=अक्षदेवी ( अक्षैरक्षान्वा दीव्यति सः )। *You have promised*

&c.—द्वादशवार्षिको वनवासोऽभ्यंगीकृतः। *Your enemies have done* &c = अपकारिणामपि शत्रूणां भवानुपकर्तुमर्हसि। *Born a Kshatriya*=क्षत्रजः। *Taking the vow* &c.=मुनिव्रतचरः, ०धरः।

## VOCABULARY VII.

अङ्गारकारक *m.* A charcoal-maker.
अतिथि *m.* A guest.
अनृतिन् *adj.* A liar.
अमल *adj.* Bright, pure.
अमात्य *m.* A minister.
अरोगिता *f.* Health, freedom from disease.
अर्थंकर *adj.* (*f.* ०री) Yielding wealth, useful.
अलक *m. n.* Hair, a curl, a lock.
आगम *m.* Acquisition, approach.
आपूर्ण *adj.* Full.
आराम *m.* A garden.
उत्खचित *adj.* Intermixed, interwoven.
उपावर्तन *n.* Returning, reviving.
करभोरू *f.* A woman having beautiful thighs.
किसलय *n.* A young tender leaf.
केतकी *f.* Name of a plant.
क्षाम *adj.* Emaciated.
गज *m.* An elephant.
गर *m. n.* Poison.
गर्भ *m.* The womb, the interior.
घनाघन *adj.* Compact, dense.
चूडामणि *m.* The crest-jewel.
छद *m.* Cutting.
जव *m.* Force, violence. speed.
तल *n.* The surface.
दरिद्र *adj.* Poor, indigent.
दर्भ *m.* A kind of grass.
दारुण *m.* Violent, intense, terrible.
दाव *m.* A forest-conflagration.
दिवाकर *m.* The sun.
द्रुम *m.* A tree.
निर्वृत्त *adj.* Grown, become.
नैकृतिक *adj.* Dishonest, wicked.
परिपाण्डु *adj.* Very pale.
पान *n.* A drink, a liquor.
पीडन *n.* Oppressing, eclipsing.
प्रचल *adj.* Trembling, shaking.
प्रणय *m.* Request. Affection, trust.
प्रदेश *m.* A region, a spot.
प्रियंकर *adj.* Acting kindly, amiable,
प्रियवादिन् *adj.* Speaking kindly or agreeably.
फलेग्रहि *adj.* Bearing fruit.
बन्धन *n.* The foot-stock of a flower or leaf. Chaining, tying, confinement.
ब्रह्महन् *adj.* A murderer of a Brâhmana.
भुजग, भुजंग, भुजंगम } *m.* A serpent.
भृंग *m.* A black bee.
मतिमत् *adj.* Clever, intelligent.

मारुत *m.* Wind.
मालाकार *m* A gardener.
मुग्ध *adj.* Lovely, charming. Simple, silly.
मोहन *adj.* (*f.* ०नी) Fascinating.
म्लान *pp. adj.* Withered, sad.
रसायन *n.* An unfailing medicine. An elixir.
राहु *m.* A demon supposed to swallow the moon at the time of an eclipse.
रुच् *f.* Luster. Appearance.
वली *f.* A curl.
वश्य *adj.* Obedient.
वाचंयम *adj.* Silent, reserved.
विकाशन *adj.* Causing to open, inspiring joy.
विप्रलून *pp. adj.* Plucked, cut off.
विलोचन *n.* An eye.
वैर *n.* Enmity.
शारदिज *adj.* Autumnal.
शीर्ण *pp. adj.* Scattered, dispersed.
श्लाघा *f.* Praise.
सकल *adj.* All.
सन्तर्पण *adj.* Giving delight or satisfaction.
सरसिज } सरोरुह } *n.* A lotus.
सादृश्य *n.* Similarity, comparison.
स्व *n.* Wealth, property.

---

# LESSON VIII.

## THE (TWO) FUTURES.

*General.*

47. Sanskrit roots are divided into three classes known as the *Anit*, the *Vet* and the *Set*. *Anit* roots are those which do not require the insertion of an intermediate इ before consonantal terminations (except those beginning with य) of the general tenses; *Vet* roots require the insertion of the इ optionally; while *Set* roots require the insertion of it necessarily. There are instances in which the same root is *Anit* in one or two of the general tenses and *Vet* or *Set* in the rest. Such special cases can be treated only under each of the tenses.

48. The following are the lists of important *Anit* and *Vet* roots :—

### *Anit Roots.*

All monosyllabic roots ending in vowels, *excepting* roots ending in long ऊ and ॠ, and the roots श्रि, श्विं, डी (A.), शी, क्ष्णु, नु, यु (2. P.), रु, क्षु, स्नु (Parasm.), वृ (वृणीते 9. A.) and वृ (वृणोति-वृणुते 5. U.).

The following roots ending in consonants:—शक् (5 P.), पच्, मुच्, रिच्, वच्, विच्, सिच्, प्रच्छ्, त्यज्, निज् (3. U.), भज्, भञ्ज्, भुज्, भ्रस्ज्, मस्ज्, यज्, युज्, रुज्, रञ्ज्, विज् (3. U.), सञ्ज्, सृज्, स्वञ्ज्, अद्, क्षुद्, खिद्, छिद्, तुद्, नुद्, पद् (4. A.), भिद्, विद् (विद्यते 4. A. and विन्ते 7. A, but not विद् 2 P.), विद् (विन्दति-ते 6. U.), शद्, सद्, स्विद् (4. P.), स्कन्द्, क्रुध्, क्षुध्, बन्ध्, बुध् (बुध्यते 4. A. To awake but not बुध् 1. U.), युध्, रुध्, राध्, व्यध्, शुध्, साध्, सिध् (सिध्यति 4. P.), मन् (4. A.), हन्, आप्, क्षिप्, तप्, तिप्, तृप् (4. U.), दृप् (4. P.), लिप्, लुप्, वप्, शप्, सृप्, स्वप्, रभ्, लभ्, क्रम् (Atm.) गम्, नम्, यम्, रम्, क्रुश्, दंश्, दिश्, दृश्, मृश्, रिश्, रुश्, लिश्, विश्, स्पृश्, कृष्, तुष्, त्विष्, दुष्, द्विष्, पिष्, पुष् (पुष्यति 4. P., but not पुष् 9. P.), विष्, शिष्, शुष्, श्लिष् (4. P.), घस्, वस् (वसति 1. P., but not वस् 2. A.), दह्, दिह्, दुह्, नह्, रुह्, लिह्, वह्.

### *Vet Roots.*

धू (धूनोति—धूनुते 5. U. धुनाति—धुनीते 9. U.), सू (सूते 2. A., सूयते 4. A.), स्वृ, व्रश्च्, अञ्ज्, मृज्, क्लिद् (क्लिद्यति 4. P. To become wet), स्यन्द्, सिध् (सेधति 1. P. To rue, to turn out auspiciously), क्लृप्, गुप् (गोपायति 1. P.), त्रप्, क्षम्, अश्, (अश्नुते 5. A.), क्लिश् (क्लिश्नाति 9. P.), अक्ष्, तक्ष्, त्वक्ष्, गाह्, गुह्, तृह् (6. P.), बृह्, वृह्; also तृप्, दृप्, नश्, द्रुह्, मुह्, स्निह्, स्नुह्. (The root कुष् when preceded by निस् becomes *Vet*).

*N. B.* Most of the other roots are *Set*.

The following verses contain the above *Anit* roots and the student should make them by heart:—

ऊदृदन्तैर्यौतिरुक्ष्णु—शीस्नुनुक्षुश्विडीङ्श्रिभिः ।
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥
शक्लृपच्मुचिरिच्वच्विच्—सिच्प्रच्छित्यज्निजिर्भजः ।
भञ्जभुजभ्रस्ज्मस्जियज्युज्रुज्—रञ्जविजिर्स्वञ्जिसञ्ज्सृजः ।

अद्क्षुद्खिद्छिद्तुदिनुदः पद्यभिद्विद्यतिर्विनद् ।
शद्सदी स्विद्यतिः स्कन्दि—हदी क्रुध्क्षुधिबुध्यती ॥
बन्धिर्युधिरुधी राधि—व्यध्शुधः साधिसिध्यती ।
मन्यहन्नाप्क्षिप्छुपितप्—तिपस्तृप्यतिदृप्यती ॥
लिप्लुपवप्शप्स्वप्सृपियभ्—रभ्लभ्गम्नम्यमो रमिः ।
क्रुशिर्दंशिदिशी दृश्मृश्—रिश्रुश्लिश्विश्स्पृशः कृषिः ॥
त्विष्तुष्द्विष्दुष्पुष्यपिष्विष्—शिष्शुष्श्लिष्यतयो घसिः ।
वसतिर्दह्दिहिदुहो नह्मिह्रुहलिह्वहिस्तथा ॥
अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम् ॥

The following lines contain the important *Vet* roots :—

सूतेधूञ्स्वरतिव्रश्च—मृजाञ्जः स्यन्दक्लिद्यती ।
सेधतिस्त्रप् गोपक्लृपौ तृप्दृप्यौ क्षमनश्यती ॥
क्लिश्नाऽश्नुते गाहगुहौ द्रुह्यमुह्यस्निहस्नुहः ।
अक्ष्णोतिस्तक्षतिस्त्वक्ष तृहतिर्वृहतिर्वृहूः ॥

## *Varieties of the Future Tense.*

**49.** There are two varieties of the Future in Sanskrit, one of them is called the Simple Future and the other the Periphrastic Future. All roots may have the forms of both the varieties.

**50.** *Formation of the base*: (*a*) Final radical vowels and penultimate prosodially short vowels are gunated, and final ए, ऐ and ओ are changed to आ, other radical vowels remaining unchanged.

(*b*) The intermediate इ is added to the syllable in the case of *Set* roots and optionally in the case of *Vet* roots. It is not added to *Anit* roots.

(*c*) The base-forming syllable स्य of the Simple Future and ता of the Periphrastic Future are then added. The स्य is changeable to ष्य by S. R. 20; and the ता is changeable to टा, धा or ढा by S. R. 25, 26, 27.

### *Examples.*

| *Roots.* | | *Base formation.* | | | *B. of Sim. F.* | | *B. of Perip. F.* |
|---|---|---|---|---|---|---|---|
| भू (*Set*) | by (*a*) भो | by (*b*) भवि | by (*c*) | | भविष्य | and | भविता |
| शुच् (,,) | ,, शोच् | ,, शोचि | ,, | | शोचिष्य | ,, | शोचिता |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| क्लिद् | (*Vet*) | by (*a*) | क्लेद् | by (*b*) | क्लेद् or क्लेदि | by (*c*) | क्लेत्स्य or क्लेदिष्य | and | क्लेत्ता or क्लेदिता |
| गे | (*Anit*) | ,, | गा | ,, | गा | ,, | गास्य | ,, | गाता |
| नी | ,, | ,, | ने | ,, | ने | ,, | नेष्य | ,, | नेता |
| शक् | ,, | ;, | शक् | ,, | शक् | ,, | शक्ष्य | ,, | शक्ता |
| भिद् | ,, | ,, | भेद् | ,, | भेद् | ,, | भेत्स्य | ,, | भेत्ता |

**51.** *Exceptions to the above rules:—*

(*a*) मृज् takes V*r*iddhi wherever Gu*n*a is ordinarily required. गुह् lengthens its vowel in cases where Gu*n*a is required, if followed by vowel terminations or the intermediate इ. सृज् and दृश् substitute र for the Gu*n*a substitute अर् when followed by a strong termination, like स्य and ता, beginning with a hard consonant; while the *Anit* roots तृप्, दृप्, सृप्, मृश्, स्पृश् and कृष् (all having a penultimate ऋ) substitute र for अर् optionally under the same circumstances. The *Set* roots कुट्, त्रुट्, स्फुट्, स्फुर्, नू and धू all of the 6th Conjugation, and विज् to tremble, do not take Gu*n*a at all. नश् and मस्ज् insert a nasal after their vowel अ when a strong termination beginning with a hard consonant immediately follows them. *E. g.*

मृज् (*Vet*)—मार्ज् or मार्जि, मार्क्ष्य or मार्जिष्य, मार्ष्टा or मार्जिता (S. R. 16 Excep. (*a*) and 20, 24, 25.)

गुह (,, )—गोह् or गूहि, घोक्ष्य or गूहिष्य, गोढा or गूहिता (S. R. 26, 27, 28.)

सृज् (*Anit*)—स्रज्, स्रक्ष्य, स्रष्टा (S R. 16 Excep. *a*, 24, 25.)

दृश् (,, )—द्रश्, द्रक्ष्य, द्रष्टा ( ,, ,, )

तृप् (*Vet*)—तर्प् or त्रप् or तर्पि, तर्प्स्य or त्रप्स्य or तर्पिष्य, तर्प्ता or त्रप्ता or तर्पिता.

स्पृश् (*Anit*)—स्पर्श् or स्प्रश्, स्पर्क्ष्य or स्प्रक्ष्य, स्पर्ष्टा or स्प्रष्टा (S. R. 16, 24.)

कुट् (*Set*)—कुटि, कुटिष्य, कुटिता.

नू ( ,, )—नुवि (S. R. 31 *b*), नुविष्य, नुविता.

नश् (*Vet*)—नंश् or नशि, नंक्ष्य or नशिष्य, नंष्टा or नशिता (S. R. 16. 24.)

मस्ज् (*Anit*)—मङ्क्, मङ्क्ष्य, मङ्क्ता.

(*b*) The intermediate इ is lengthened necessarily in the case of ग्रह्, and optionally in the case of वृ and roots ending in ॠ (long). Roots ending in ऋ (short), हन् and गम् (Parasm.) take the intermediate इ though *Anit*, and the roots नृत् and कृत् drop it optionally though *Set* before the स्य of the Simple Future. In the Periphrastic Future, the roots इष्, रिष्, लुभ् and सह्, though *Set*, drop the intermediate इ optionally. *E. g.*

ग्रह् (*Set*)—ग्रही, ग्रहीष्य, ग्रहीता । वृ (*Set*)-वरि or वरी, वरिष्य, or वरीष्य, वरिता or वरीता । तॄ (*Set*)—तरि or तरी, तरिष्य or तरीष्य, तरिता or तरीता । Similarly स्मृ (*Anit*)—स्मरिष्य, स्मर्ता । कृ (*Anit*)—करिष्य, कर्ता । हन् (*Anit*)—हनिष्य, हन्ता । गम् *Anit*)—गमिष्य (P.) and संगंस्य (A.), गन्ता and संगन्ता । नृत् (*Set*)—नर्तिष्य or नर्त्स्य, नर्तिता । लुभ् (*Set*)—लोभिष्य, लोभिता or लोब्धा (S. R. 26) । सह् (*Set*)—सहिष्य, सहिता or सोढा (S. R. 26 and 27.) ।

(*c*) The roots क्लृप्, वृत्, वृध् and स्यन्द् are Atmane. and as such have their regular forms of the Simple Future, but they may have in addition the Parasm. forms in which case the intermediate इ is not added. This holds in the case of क्लृप् in the Periphrastic Future also. *E. g.*

क्लृप् (*Vet*)-कल्प्स्य or कल्पिष्य (A.), कल्प्स्य (P.) । स्यन्द् (*Vet.*)—स्यन्त्स्य or स्यन्दिष्य (A.), स्यन्त्स्य (P.) । वृत् (*Set*)——वर्तिष्य (A.) and वर्त्स्य (P.) । वृध् (*Set*)—वर्धिष्य (A.) and वर्त्स्य (P.) ।

Perip. Future base कल्प्ता or कल्पिता, स्यन्ता or स्यन्दिता, वर्तिता, वर्धिता (all Atm.), and कल्प्ता (Parasm.).

25. *Terminations.* To get the forms of the Simple Future, the Parasm. and Atm. terminations of the Present tense are added to the base in the same way as they are added to roots of the first Conjugation. Parasm. roots take Parasm. terminations, Atm. roots take Atm. terminations, and roots belonging to both the *Padas* may take either of the two sets of terminations. Thus :—

Rt. दा. U. (base दास्य).

| *Parasmaipada.* | | | *Atmanepada.* | | |
|---|---|---|---|---|---|
| दास्यामि | दास्यावः | दास्यामः | दास्ये | दास्यावहे | दास्यामहे |
| दास्यसि | दास्यथः | दास्यथ | दास्यसे | दास्येथे | दास्यध्वे |
| दास्यति | दास्यतः | दास्यन्ति | दास्यते | दास्येते | दास्यन्ते |

To get the forms of the Perip. Future, the following terminations are added :—

| *Parasmaipada.* | | | *Atmanepada.* | | |
|---|---|---|---|---|---|
| *स्मि | स्वः | स्मः | *हे | स्वहे | स्महे |
| सि | स्थः | स्थ | से | साथे | ध्वे |
| — | रौ | रः | — | रौ | रः |

Rt. दा U. ( base दाता ).

| | | | | | |
|---|---|---|---|---|---|
| दातास्मि | दातास्वः | दातास्मः | दाताहे | दातास्वहे | दातास्महे |
| दातासि | दातास्थः | दातास्थ | दातासे | दातासाथे | दाताध्वे |
| दाता | दातारौ | दातारः | दाता | दातारौ | दातारः |

*Additional Examples.*

शी—शयिष्यते, शयिता । जीव्—जीविष्यति, जीविता । निन्द्—निन्दिष्यति, निन्दिता । मुह्—मोहिष्यति or मोक्ष्यति, मोग्धा or मोढा or मोहिता (S. R. 26, 27) । क्षम्—क्षंस्यति-ते or क्षमिष्यति-ते, क्षन्ता or क्षमिता (S. R. 29) । स्तु—स्तोष्यति-ते, स्तोता । रुध्—रोत्स्यति-ते, रोद्धा । प्रछ्—प्रक्ष्यति, प्रष्टा । द्विष्—द्वेक्ष्यति-ते, द्वेष्टा । दह्—धक्ष्यति, दग्धा । नह्—नत्स्यति-ते, नद्धा । सृज्—स्रक्ष्यति, स्रष्टा । लिह्—लेक्ष्यति-ते, लेढा (S. R. 26. 27.) । गम्—गमिष्यामि, (संगंस्ये), गन्तास्मि, (संगन्ताहे) । वृत्—वर्तिष्ये or वर्त्स्यामि, वर्तिताहे । सह्—सहिष्ये, सहिताहे or सोढाहे । नृत्—नर्तिष्यामि or नर्त्स्यामि, नर्तितास्मि । वह्—वक्ष्यति-ते, वोढा । दृश्—द्रक्ष्यामि, द्रष्टास्मि । बन्ध्—भन्त्स्यति, बन्द्धा । लभ्—लप्स्ये, लब्धाहे । मृ—मरिष्यामि, मर्तास्मि. (This root is Parasm. in the two Futures, the Conditional and the Perfect ).

